Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS 2.2

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रधानाचार्या श्रीमती सुशीला सुखवानी
द्वारा प्रदत्त
प्रमोद कुमार दीक्षित

कलि कौतुकम्

रचयिता

आचार्य : राधामोहनोपाध्यायः

प्रकाशकः

विद्याभारती विद्वत्परिषद्, पश्चिमबंग

३१ डा. गंगाधर मुखर्जी रोड,

फजीर बाजार, हावड़ा-१

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुस्तक प्राप्तिस्थानम् :
मंगलदीप अपार्टमेन्ट, डी-ब्लाक
५०६ जी.टी रोड (दक्षिण)
फ्लैट नं. २०२, (द्वितीय तल)
फजीर बाजार, हावड़ा-७११११०१

मूल्यम् : ७५/-

मुद्रक:
आशुतोष प्रिन्टर्स
३५२, जी. टी. रोड,
सलकिया, हावड़ा-७१११०६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कलिकौतुकम्

अनुक्रमणिका

१. स्तुति वाटिका (प्रथमोऽ ध्याय:) १

सरस्वती-गणपति-विष्णु-गंगा-श्रीराम-श्री कृष्ण-हनुमत्-शिव-देवी-काल भैरव-साईं-दयानन्द स्तुतय: मातृभूमि वन्दना।

२. द्वितीयोऽ ध्याय: - नारद वैचित्यम् भारतयात्रा वर्णनम् ११

३. तृतीयोऽ ध्याय: - कलिपुत्रवर्णम् १७

४. चतुर्थोऽ ध्याय: - कलिपुत्रकथा २०

५. पञ्चमोऽ ध्याय: - पूर्वकथाक्रम: २४

६. षष्ठोऽ ध्याय: - कलिलीला २८

७. सप्तमोऽ ध्याय: - निर्भया तथारुषी कथा प्रधानाचार्य दुर्दशा ३२

८. अष्टमोऽ ध्याय: - ग्रामाञ्चल घटना ४०

९. नवमोऽ ध्याय: - न्यायालयदृश्यम् ४४

१०. दशमोऽ ध्याय: - रामजन्मभूमि प्रकरणम् ४७

११. एकादशोऽ ध्याय: - कोलकातायात्रा ५०

१२. द्वादशोऽ ध्याय: - भारते हिन्दूनां स्थिति: ५३

१३. त्रयोदशोऽ ध्याय: - शिक्षालयानां दशा ५८

१४. चतुर्दशोऽ ध्याय: - बलात्कार:, पितरौ हत्या स्वसुतेन तस्य पत्न्या च ६२

१५. पंचदशोऽ ध्याय: - ब्राह्मण सेवकस्य शूद्राधि कारिणा दमनम् ६७

१६. षोडशोऽ ध्याय: - शिक्षाया: दुर्दशा ७१

१७. सप्तदशोऽ ध्याय: - जनप्रतिनिधिचयने, भ्रष्टाचार, दरिद्र-ब्राह्मणवंशनाश: ७४

१८. अष्टादशोऽ ध्याय: - समलिङ्गीय संभोगाग्रह कथा ८१

१९. संस्कृत कवि सम्मेलनम् ८४

२०. कलिपुत्र-पुत्रवधू प्रसंग: ९१

२१. कविनिवेदनम् , शुभकामना ९५

२२. स्तुति माल्यम् ९८

चण्डिका-शिव-श्री कृष्ण, भक्ति पायसम्, श्री बालगोपालाह्वनम्, एकादशाश्वस्ति, वचनानि साई देवस्य. मातृभूमि वन्दना।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरोवाक्

संस्कृतं मृतभाषेति श्रुत्वा हावड़ा
नगर्याम् एकस्यां सभायां पाश्चात्यसंस्कृति
प्रभावितैक विदुषः (विदूषकस्य वा) मुखात्
मनो मे जातं विखिन्नम् । ततः परं
मया संकल्पितं केवलं देवभारतीगिरा
लेखनस्य। प्रारंभत संस्कृतकाव्यं
लेखनश्रंखला। मदीयं संस्कृतकाव्यं
भवति सरलम्। हिन्दी-बांग्लादि
भारतीय भाषाभाषिणो जनाः
अञ्जसा पठितुमवगन्तुं च भवन्ति
समर्थाः। एतत् लघुकाव्यं भविष्यति
उदाहरणं मम कथनस्य।

साहित्यं भवति समाज-दर्पणम्
इति सर्वे जानन्त्येव। दृष्ट्वा
वर्तमान समाजस्यभयावहं दृश्यं
मनसि भवति बहुकष्टम्। दैनिक
समाचार-पत्रेषु बलात् बहुजन
भुक्तायाः मृतायाः म्रियमाणायाः वा
वार्ता प्रत्यहं प्रकाशिता भवति।
दैनिक समाचारपत्र-पठनमपि भवति
क्लेशदं लज्जास्पदम् च।
दिने-दिने विवर्धते पापाचारः।
पूज्यपुरुषाणां निजैः एव जनैः भवति
अवमानना। शिक्षकः भवति

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तिरस्कृतः प्रताडितश्च निजैः एव
छात्रैः/पितरौ भूयेते तिरस्कृतौ
निजैरेव पुत्रैः धनार्थम्। वृद्धाश्रमाणां
हि संख्या अस्ति विवर्धमाना।
मंत्रिणः लुण्ठन्ति राजकोषं ददति च
संरक्षणं राजकोष लुण्ठकेभ्यः। सम
लैङ्गिक संभोगो भवेत् वैधम् अस्त्येत
दर्थम् आन्दोलनम् । एवं विधाः
सन्ति बह्व्यः वार्ताः पाठकाः भवन्ति
खिन्न-खिन्नाः एतदेव वर्त्तते कारणं
कलिकौतुम्-लेखने। पठन्तु
पश्यन्तु च पाठकाः कलिकर्दमम्।
भवेदवसानं कलिकुकर्मणः भारते।
भवेद् भारतं भा-रतम्, लभेत पुनः
विश्वगुरु-पदवीं स्वदेशः
भाषा-छन्द-टंकण मुद्रणादिदोषाः
भवन्तु क्षम्याः
सुरभारती सेवकः
आचार्यः राधामोहनोपाध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कलि कौतुकम्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कलिकौतुकम्

अथ प्रथमोऽध्याय:

स्तुतिवाटिका

१.सरस्वतीस्तुति:

नमामि हंसवाहिनीं रोगशोकहारिणीम्
समस्त पापनाशिनीं देवदु:खहारिणीम्।
भवाम्बुधौ निपातितास्त्वां स्मरन्ति मानवा:
ददातु सा पराम्बिका ज्ञानभक्तिमद्य मे।। १

२. श्रीगणपति स्तुति:

नमो भूयोभूयो गणपतिसुदेवाय सततम्
गुणानामागारो भवतु भजतेभ्यो हितकर:।
वितुण्डं ते दृष्ट्वा निखिलभवबाधा प्रशमते
गणाध्यक्षो भूयात् सकल दुरितानां क्षयकर:।। २

३.श्री विष्णु स्तुति:

नमामस्तं देवं निवसित सदा यस्य हृदये
विषादग्रस्तेभ्यो ललितसुखदा वै लहरिका।
सदावामे लक्ष्मीर्निवसति नु तस्मै मम नुति:
मुदा लक्ष्म्या सार्धं हरिरवतु मां पादपतितम्।। ३

४. गंगास्तुति:

कदा गंगे मातस्तव रुचिरनीरे हि स्नपनम्
सुखं लप्स्ये मातस्तव हि तनयोऽहं भुवितले।
कदा वै कल्पाणी श्रवणसुखदा ते लहरिका
सुधाधौतापूता नयनपथगा मेऽस्ति भविता।। ४

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५. श्रीरामस्तुतिः

सीता वामे संस्थिता यस्य नित्यम्
भ्राता त्वन्ये लक्ष्मणो यस्य वीरः।
पादप्रान्ते वातजातोऽस्ति भक्तः
तं श्रीरामं विश्ववन्द्यं नमामः।। ५

शरणं हि समागतमज्ञमिमम्
भवदीय दया प्रियपात्रजनम्।
अवलोकय, राम, विलम्बवधम्
कुरु नैव कदापि शतं विनयम्।। ६

नहि साधुसुभावभरो हिजनः
खलबुद्धिधरः खलभावभरः
कुजनो नहि संत सुभावभरः
अत एवभिया शरणं द्रवते।। ७

खलबुद्धिधरं हतभावभरम्
नहि कोऽपि पिता तनयं त्यजते।
पितरं कुशलं भवभीतिहरम्
तनयो हि दयां तव भिक्षयते।। ८

नहि बुद्धिबलं नहि बाहुबलम्
नयने युगले बहुनीरभरे।
पितरं -पितरं त्वनिशं भजते
वद कोऽस्ति पिता तनयं त्यजते।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रघुवीर दयां मयि धेहि सदा
विनयं कुरुते बहुभीतजनः।
भव, राम, सहायक मे त्वनिशम्
नहि रामसमो भवभीतिहरः।। १०

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

६. श्री कृष्णस्तुतिः

निखात्योत्खात्य सुद्दढम् गिरिं गोवर्धनं हरिः/
विधाय छत्रकं त्राताः सुरेन्द्रात्स्वव्रजौकसाः// ११

निहताः कंस प्रेषिताः कंसेन सह राक्षसाः।
कारामुक्तौ हि पितरौ कृतौ तस्मै नमोनमः।। १२

पाण्डवाः रक्षिता येन घातिताः क्रूर कौरवाः।
गीताज्ञानामृतं दात्रे श्री कृष्णाय नमोनमः।। १३

कामदेवेव मोहकं नृसिंहेव भयावहम्।
प्रेम्णा भिया च सन्मार्गे स्थापकाय नमोनमः।। १४

आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।
देशो धन्यायितो येन तस्मै कृष्णाय मे नतिः।। १५

७. श्री हनुमत्स्तुतिः

रामानुजाय घननादनिपातिताय
दुर्लभ्यमौषधमिदं समयेन दत्तम्।
आसीदिदं न सुलभं सुबलेन किन्तु
स्तुत्यं कृतं वरद जीवनदानमेव।। १६

यस्य स्मरण मात्रेण प्रेता दुष्टग्रहादयः।
पलायन्ते भयाक्रान्ताः तस्मै हनुमते नमः।। १७

सुभक्ताग्रगण्यं गुणीनां वरिष्ठम्
कृतं तेन स्तुत्यं हि कार्यं यशोदम्।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सदा रामभक्ताय साहाय्यदाता
धिया तं नमामो हृदा तं नमामः।। १८

८. शिवस्तुतिः

(१)

वन्दे कामारिदेवं नीलकण्ठं दयालुम्
शोभाढ्यं नीलवर्णं त्राणदं पार्वतीशम्।
औदार्यं ते त्रिलोके ख्यातविख्यातमस्ति
भक्तेभ्यो जीवनाशां शंकरं नौमि नित्यम्।। १९

(२)

हे प्रभो हे प्रभो हे प्रभो पाहि माम्
दुःखदारिद्र्य सिन्धौ गतं पाहि माम्।
नैवलोके बिनाथोऽस्ति मे सदृशः
नैव लोके सुनाथोऽस्ति ते सदृशः।। २०

को न जानाति लोके दयासागरम्
सौख्यादाने सुतेभ्यः मुदा तत्परम्।
को न जानाति कारुण्य-सिन्धुं जनः
नैव दृष्टा दया तावकीना मया।। २१

त्राहि मां पाहि माम् दुःखसिन्धौगतम्
त्राणदाने विलम्बोऽस्ति नूनं वधः।
कथ्यते श्रूयते पातकी ते सुतः
क्षाल्यतां पातकं दीयतां गौरवम्।। २२

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पश्य दीनः सुतोऽयं हि रोरुद्यते
नैव कार्यों विलम्बो दयालुः प्रभो।
दीयतां मे सुबुद्धिर्विचारो नयः
येन यान्तु क्षयं दुर्विचारा द्रुतम्।। २३

९. देवीस्तुतिः

उद्भवस्थिति संहार कारिर्णी लोकमातरम्।
सर्वमानवकल्याण हेतवे नौभि नित्यशः।। २४

दुष्टाय कालरूपिर्णी भक्ताय मातृकोपमाम्।
देवीं भगवतीं दुर्गां प्रणमामि पुनः पुनः।। २५

१०. कालभैरव स्तुतिः

काशिकापुराधिनाथ कालभैरवं भजे।
तापशापनाशकाय भैरवाय ते नमः।। २६

दुःख दैन्यशोक ताप हारिणे सदा नमः।
भैरवाय भक्तदुःखहारिणे हृदा नमः।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

११. साईं-स्तुति:

कलौ साईं कलौ साईं कलौ साईं सुकीर्त्तनात्।
दु:खं सर्वविधंनाशं याति साईं प्रसादत:।। २८

ईश्वरस्त्वेक एवास्ति श्री कृष्णवचनं त्वया।
लोककल्याणहेतवे पौन: पुन्येन घोषितम्।। २९

प्रेरयंति स मानवान् लब्धुं सुखं स्व जीवने।
भक्ता: प्राप्य मनोरथान् दर्शयन्ति कृतज्ञताम्।। ३०

साईं सिद्धो महात्मास्ति दर्शयामास सेवकान्।
चमत्कारान् पुन: पुन: सन्मार्गे स्थापनाय तान्।। ३१

शुभेच्छा तस्य पावनी बभूव हितकारिणी।
त्यक्त्वा पान्थकलहान्ते जग्मु:एक पथा मुदा।। ३२

नास्तिकान्धर्ममूढान् विलासें रतान्
सत्यमार्गे तु संस्थाप्य वै जीवने।
प्रापितं सौख्य सिन्धुं मुदा सज्जनान्
ईशाभक्ताय तस्मै नमामो नमाम:।। ३३

साईं नैव मृतोऽमृत: चिन्मय: करुणालय:।
सर्वधर्ममयो हरि: सर्वताप हरो विभु:।। ३४

स पूत हृदयान् जनान् प्रेरयति शुभाशिषा।
तेऽपि प्राप्य निजेच्छितं दर्शयन्ति कृतज्ञताम्। ३५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३६. स्वामिदयानन्द स्तुतिः

राजप्रासाद सौख्ये सुखं संस्थिताः
राजकीयेन वित्तेन संपोषिताः।
वैदिकं ये रहस्यं न ज्ञातुं क्षमाः
स्वामिनः प्रीतये तैः कृता जल्पना।। ३६

शाब्दिकै र्बौद्धिकै र्व्याहतो वै हरिः
आगतो वै दयानन्दरूपेण सः।
तेन दिव्यं स्वरूपं निजं दर्शितम्
वैदिकं वाङ् मयंरूपमास्थाय सः।। ३७

दयानन्दसिंन्धुं परब्रह्मलिंगम्
सदा सज्जनानन्दरूपं नमामः।
कृतं तेन लोकस्य कल्याण हेतोः
यदा विवृतं तेन वेदार्थमग्र्यम्।। ३८

दयानन्दोद्‌घोषः

जायन्ते च म्रियन्ते च पृथिव्यां सर्वमानवाः।
किन्तु ज्ञानमयो वेदः जन्ममृत्युपरोऽ मरः।। ३९

ऋषयोमंत्रद्रष्टारः स्रष्टारो नैव नैव ते।
परमाणु सुवाहनं सच्चिदानन्द विग्रहम्।। ४०

नित्यं ज्ञानमयंब्रह्म सद् विद्या बीजमीश्वरः।
नास्त्यत्र वर्तते कथा ह्यवतारस्य कस्यचित्।। ४१

दीपेन दीपज्वालनं क्रियतेमानवैर्यथा।
तथा वेदप्रदीपेन आत्मदीपं हि प्रज्वलेत्। ४२

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१२. मातृभूमिवन्दना

नमस्ते शरण्ये प्रिये मातृभूमे
त्वदीयाशिषा जीवितो वर्धितोऽहम्।
त्वदीयाय सौख्याय प्राणान् जुहोतुम्
सुखं प्रस्तुतोऽयं सुतस्ते हि मातः।। ४३

न वै वैभवं स्वर्ग लोकस्य याचे
सदा याचते शंकरं वातजातम्।
पराम्बां तथा मातरं भारतं त्वाम्
सुतस्तेऽस्तु सेवापरो धर्ममूर्तिः।। ४४

शरीरं भवेत्साधनं नैव साध्यम्
रिपून्ते निहन्तुं सदा प्रस्तुतः स्याम्।
त्वदीयां सुकीर्तिं प्रसारे सुलग्नः
सदा दुःखिने सौख्यदाने रतः स्याम्।। ४५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवेद्वेदचर्चा भवेद्धर्मवार्ता
भवेल्लोकवाणी मुदादेववाणी।
स्वदेशे विदेशे तथा सर्वदेशे
सुखं श्रूयमाणा तथा ब्रूयमाणा।। ४६

नमामो वयं देवभूमिं दयाढ्याम्
नमामो मुनीन्देशजातान्हि सर्वान्।
सदा तैर्हि दिष्टैः सुमार्गैश्चलेम
सुवर्धेतमातुर्यशोकर्म कुर्याम्।। ४७
सदा धर्मभावेन संप्रेरितः स्याम्
कुधर्मे रतिर्नैव भूयात्कदापि।
त्वदीये शुभाङ्के निवासाय देवाः
बुभुक्षार्दिताः देवलोके भवेयुः।। ४८

इति प्रथमोऽध्यायः

जयतु भारतम्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कलिकौतुकम्

अथद्वितीऽयोध्याय:

एकस्मिन् दिवसे स्वर्गे हाहाकार: समुत्थित:।
धावं-धावं हि सर्वत: देवास्तत्र समागता:।। १

आसीदेकोऽति विक्षिप्त: नग्ननग्नो रुदन् मुहु:।
वीणाहस्तो महात्मेव भयाक्रान्तेव लक्षित:।। २

भूतले दृश्यते दृश्यम् एवं विधं यदाकदा।
ब्रह्मा विष्णु महेशा श्च पत्निभि: सह सत्वरम्।। ३

समागता हि संद्रष्टुं भूलोकेव हि नाटकम्।
अदृष्टमश्रुतं दिवि देवविस्मयकारकम्।। ४

कराभ्यां ताडनमुर: शिरश्चापि प्रताडनम्।
असकृद् रोदनं तथा बहून्मत्तेव नर्तनम्।। ५

तारस्वरेण चीत्कार: व्यर्थं-व्यर्थं हि जीवनम्।
नेच्छामि जीवनं विष्णो प्राणान् मे हर हे हर।। ६

पेतुस्तस्याश्रु विन्दव: कपोलादुरसिभृशम्।
दर्शं दर्शं हि करुणां दशां योगीश्वरस्य वै।। ७

भृशं विचलिता जाता: देवास्तत्र समागता:।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इन्द्राद्याः सकला देवाः पप्रच्छुः विष्णुमानताः।। ८
कोऽयं विक्षिप्त संन्यासी भूलोकात्समुपस्थितः।
भयार्त्तेव हि लक्ष्यते नायं सामान्यमानवः।। ९

स्मयाननस्तदा विष्णुः देवान् प्रति जगाद ह।
नारदोऽ यं महायोगी मृत्युलोकात् समागतः।। १०

दृष्ट्वा तत्रातिविस्मयं जातास्य इदृशी दशा।
एष पृच्छामि नारदं स्वस्थंविधाय कारणम्।। ११

श्री विष्णोः कृपया जातः स्वस्थचेता मुनीश्वरः।
ननाम श्रद्धया विष्णुं ब्रह्माणं शंकरं तथा।। १२

श्रीभगवान् उवाच -

योगिराज कथं कथं विक्षिप्तो लक्ष्यते भवान्।
दुःखात्ते चिन्तिताः सन्ति दिविस्थाः सर्व देवताः।। १३

कारणं विवृतं ब्रूहि केन दुरात्मना कृतम्।
वैवर्ण्यं तव योगिराज प्रतिकारो भविष्यति।। १४

नारद उवाच -

न केनापि जनेनाहं प्राप्तवान् दारुणं कष्टम्।
स्वयमेवासिना छिन्ने सुखशान्ती स्वजीवने।। १५

दिदृक्षुर्मर्त्य लोकस्य दशां तत्र गतो जनः।
नासीच्चिन्ता यतः कलिः प्रथमचरणे ऽ धुना।। १६

इन्द्र उवाच-

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कथं न गतवान् भवान् पुण्यदेशं हि भारतम्।
श्रूयते यत्र सर्वदा वेदध्वनिः गृहे-गृहे।। १७
गंगा च यमुना चैव नद्यः सरस्वती समाः।
यत्र गर्जन्ति गर्जन्ति पापो दूरं पलायते।। १८

नारद उवाच (कर्णौ पिधाय)
मैवं वदस्व देवेश नदीनां विषये भवान्।
सरस्वती स्व गता कुत्र भूगर्भे वा दिवं गता।। १९

वदत्वत्र स्वयं विधिः तनया यस्य कथ्यते।
दौर्भाग्यं तु यमुनायाः विण्मूत्रवाहिनी समा।। २०

हस्तिनापुर पार्श्वे तु दृश्यं परमकष्टदम्।
यमुनास्ति प्रदूषिता कृशाङ्गीमरणासन्ना।। २१

दृष्ट्वा पलायितो जातः गतवान् काशिकापुरीम्।
विश्वनाथ दिदृक्षासीत् गंगास्नानाय मे रुचिः।। २२

वरुणा-ऽसीति मध्यस्था वाराणसी प्रकीर्त्तिता।
असीति नामिका क्षुद्रा यत्र पतति नालिका।। २३

अस्सी घट्टेति तत्थानं वदन्ति काशिवासिनः।
किन्तु हा धिक् धिगीति भो दर्शं दर्शं तु दुर्दशाम्।। २४

अश्रुसिक्तो जनोऽभवत् वक्तुं नैव हि पारये।
असकृद् भ्रमपीडितो जातोऽयं नारदो मुनिः।। २५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मलमूत्रं नगरस्य वाहिनी नदिका ऽ धुना।
अस्सीघट्टान्तिकं त्वेषा गंगायां पातयत्यहो। २६
पातकं तु नगरस्य विण्मूत्र मिश्रितं जलम्।
शिवभक्तास्त्वनेकशः स्नान्ति भक्त्यान्धचक्षुषः।। २७

दृश्यं रोमाञ्चकंतत्र वीरास्ते दर्शने क्षमाः।
दर्शं दर्शं तु दुर्दशां गंगायाः पावने तटे।। २८

विदीर्णं हृदयं जातं द्रुतमेव पलायितः।
शिरसः पतनं शम्भोः जातं दुर्गति कारणम्।। २९

निर्गता विष्णु चरणात् धृताशिरसिशंभुना।
तां निनाय भगीरथः भुविकल्याणहेतवे।। ३०

आसीद् गंगाऽति पावनी देवेभ्योऽपि सुदुर्लभा।
नारकीया तु संयाता मानवानां प्रमादतः।। ३१

एवं चिन्तयतस्तस्य नारदस्य नदीतटे।
शवद्वयं तु गंगायां सहसा दृष्टिसादभूत्।। ३२

शवोपरि स्थिताः काकाः आसन्तत् खादने रताः।
अन्ये चोड्डीय परितः स्वांशाययुयुधुः भृशम्।। ३३

तटे तु कुक्कुरा दृष्टाः शवभक्षणकर्मणि।
निरता मांसखादने मध्ये-मध्ये तु बुक्कने।। ३४

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नारकीयं तु तद् दृश्यं दृष्ट्वा योगी पलायितः।
सकृद् भीतिः समागता किमहं नरकेऽधुना।। ३५

पश्चिमाशां गतः सूर्यः तत्रैव नारदोऽप्यगात्।
दृष्टवान्नगरं त्वेकं गंगायाः पावने तटे।। ३६

आसीदेतत्कर्णपुरम् (कानपुर) आढ्यनिकेतनैर्युतम्।
ब्रह्मर्षयेतु नारोचत दिव्यं नगर-दर्शनम्।। ३७

जलवीचियुतागंगा गता कर्णाक्षिगोचरा।
किन्तु हा धिक् पलायताम् दृश्यं हि पापदायकम्।। ३८

नगरे कृन्तनं गवां चर्ममांसादि हेतवे।
मुख्य व्यापार रूपेण चाल्यते पापिभिर्नरैः।। ३९

चर्ममांसास्थिक्षालितं जलं पतति गंगायाम्।
विड्मूत्राणां हि निर्झरं प्रदूषयति जाह्नवीम्।। ४०

धैर्यमाधाय नारदः दिव्य दृष्ट्या तु दृष्टवान्।
दृश्यं देश नगराणां स्थितानां वै नदीतटे।। ४१

सर्वानद्यः प्रयुज्यन्ते विण्मूत्राद्यपसारणे।
तासामेव नदीनां वै जलं पिवन्ति मानवाः।। ४२

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदेव पशुपक्षिणः तदेव निर्धना जनाः।
दर्शं दर्शं तु दुर्दशां नदीनां नारदो मुनिः।। ४३

निश्चिकाय न यास्येऽहं भारते तु नदीतटे।
ऋषीणां च मुनीनां च देशोऽयं रामकृष्णयोः।। ४४
वैदेशिक प्रभावेण दीर्घदास्येन पूर्णतः।
भ्रष्टः कुपथगोऽ भवत् स्वधर्मच्युतिकारणात्।। ४५

किन्तु प्रशासकं पश्य शोकं मा वह नारद।
मुनेः निजान्तरात्मैव ब्रूते तं प्रस्फुटं वचः। ४६

इति द्वितीयोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथतृतीयोऽध्याय:

दृष्ट्वा विशालं नगरं सुरम्यम्
नदीतटे संस्थित धौतवर्णम्।
लालायितो भावुक नारदो ऽ यम्
द्रुतं तदाधावत तद्दिदृक्षुः।। १

ध्वनि प्रदूषणं तस्मै बभूव कष्टदायकम्।
किन्तु भुवि पराजयं येनकेनापि हेतुना।। २

नासीत् सह्यं तु मुनये पूजितो योऽ मरैरपि।
विशालात् मण्डपाद् ध्वनिः समागच्छति तत्रहि।। ३

वैवाहिक समारोहः आसीदायोजितो विराट्।
वाद्यं बहुविधं तस्य ध्वनि विस्तारकेणवै।। ४

विस्तारणं तु दारुणं विस्फोटकं पदे-पदे।
कर्णौं में वधिरौ मामूत् अतः मुनिः पलायितः।। ५

स तस्मिन्नेव नगरे दृष्टवान्नारदो मुनिः।
काली पूजा विसर्जन-दृश्यमतीव भीषणम्।। ६

वधिरीकरणे क्षमाः विस्फोटा हि भयावहाः।
भवन्ति-स्म क्षणे-क्षणे यंत्रैः ध्वनिविस्तारकैः।। ७

भाषणं गायनं तथा जयकारः पदे-पदे।
वधिरीकरणाय तु ध्वनिरेकाऽपि सुक्षमा।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अहोधिक् किं चलत्येष मनसि नारदोऽब्रवीत्।
यूथेषु नर्तनं तत्र युवकानां तु दृष्टवान्।। ९

युग्म यूथेषु नर्तनं ललनानां विमोहकम्।
कटिभङ्गी उरोजयो: कम्पनं कामवर्धकम्। १०

बहवो दर्शकास्तत्र ददतिस्म हि रुप्पकम्।
कामिन्य: प्राप्यरुप्यकं स्मितीक्षणा: प्रकुर्वन्ति।। ११

स्वागतं स्नेहवर्धकं प्रीतास्तुष्टाश्च दानिन:
गणेशभक्तिनर्तनं नासीद्वै तत्र नर्तने।। १२

अश्लीलं तत्प्रदर्शनं ध्वनिप्रदूषणं महत्।
दृष्ट्वा श्रुत्वा च नारद: दृश्यंगीतं भयावहम्।। १३

मनसि चिन्तयामास किमहमस्मि भारते।
देवाश्चापि सुदुर्लभं मन्यन्ते जन्म यत्र वै।। १४

गन्तुं समुद्यतोऽ भव-न्नारद: पुण्य दर्शन:।
तावदेव ददर्श ह मातृभक्तं सुतं वरम्।। १५

मातु: छायेव गच्छन्तं सुतं विलोक्य नारद:।
गतखेद: प्रसन्नात्मा प्राप्तानन्दो बभूवह।। १६
तावदेव ददर्शह वामे वै शिवमन्दिरम्।
शून्यं पूतं हि मन्दिरं गत्वा बद्धासनोऽ भवत्।। १७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आसीत्तस्याति जिज्ञासा मातृभक्त्या हि कारणम्।
यतः सुतोहि पत्नी च आस्तां सुशिक्षितावुभौ।। १८

पाश्चात्य संस्कृति स्नातौ स्वार्थपूर्णौ हिलक्षितौ।
मातृभक्तौकथं जातौ एवं विधौ स्वजीवने।। १९

वृत्तमिदं विचार्यैव गन्तव्यं कुत्रचित्पुरः।
दिव्यं स्थानं विलोक्य सः क्षणं यातः प्रमीलितः।। २०

ददर्श दिव्यं सुखदं मनोरमम्
तयोरतीतं प्रियवर्त्तमानम्।
न सा हि नारी विवशातिनिर्धना
सदानुकूलोहि सुतः प्रियंवदः।। २१

जातं सर्वं सु विवृतं कालेनाल्पेन मुनये।
दर्शं-दर्शं तु प्राक्तनं जीवनं तत्कुलस्य हि।। २२

रोदनं च प्रहसनं युगपद् दृष्टिगोऽभवत्।
नारदस्य मुखाकृतिः सुस्पष्टं बदतीव भो। २३
इति तृतीयोऽध्यायः।।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथचतुर्थोऽध्याय:

हावड़ा नगरान्तिके आसीद् ग्रामो हि देवल:।
तत्रासीदति सम्पन्न: विप्र: एको महाबल:।। १

पत्नी तस्या हि सुलभा पतिव्रता च धार्मिका।
पुत्रस्त्वेको हि सुमुख: पित्रो: शुश्रूषणे रत:।। २

स्वतंत्रे भारते जाते आंग्लभक्ता: प्रशासका:।
आंग्ल संस्कृतिशिक्षाया: प्रचारो हिव्यवर्धत।। ३

नासीत्तथाविधं प्रेम आंग्लाभाषां कृते तदा।
दास्यभावे यदा देश: सर्वथा पर्यतप्यत।। ४

ज्ञान धनबलेन च जातो विप्रो महाबल:।
ग्रामप्रधान पदभाक् दयालु: प्रियदर्शन:।। ५

न्यायप्रिय: प्रशंसित: गेहे गेहे च सर्वदा।
पुत्र: सुदर्शनस्तस्य प्राप्तशिक्षो बभूवह।। ६

महा विद्यालये जात: आंग्लभाषा सुशिक्षक:।
हावड़ा नगरे रम्ये प्रवक्तापदभूषित:।। ७

कन्या पक्षो विवाहार्थम् आगच्छत् प्रत्यहं गृहम्।
एक: कन्या पिता हि तम् वरपितरमब्रवीत्।। ८

कन्या मे सुमुखी तथा धर्मप्राणा प्रियंवदा।
पितृ सेवापरा सदा दयावती सुलोचना।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सेवामूर्ति र्हि कर्मठा रामायण-सुपाठिनी।
धर्मवती नु जन्मना गृहवैभवरूपिणी।। १०

तमब्रवीन्महाबल: आदौ पुत्र विचारणाम्।
ज्ञात्वा पश्चात् ब्रवीम्यहं अद्य कष्टाय क्षम्यताम्।। ११

मदीयेन विचारेण साक्षाल्लक्ष्मी: सुतातव।
सौभाग्यं मे भविष्यति सुता ते यदि लभ्यते।। १२

गते तस्मिन् द्विजे पिता प्रीतमनाबभूव ह।
नूनं कन्यास्ति सुभगा गृह कर्मविशारदा।। १३

सुलभार्थं सहायिका सर्वकल्याण साधिका।
सुलभाया: विचारोऽ पि श्रोतव्यो नु सहायक:।। १४

एतस्मिंन्नेव कालेतु सुलभा स्वयमागता।
प्रसन्न हृदय: पिता भामिनीं समवोचत।। १५

प्रिये श्रृणु प्रियां वार्तां पुत्र जाया भविष्यति।
वार्धक्ये न: सहायिका कर्मवीरा च धार्मिका।। १६

पुत्राय ते सहायिका यदि चेत् स्वीकरोति ताम्।
ओमित्युवाच सुलभा सुतस्यास्तु समर्थनम्। १७

दासीं प्रेष्य समाहूय सुतं प्रोवाच मातृका।
पुत्र तेऽ तीव सौभाग्यं भार्या लक्ष्मीस्वरूपिणी।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समागमिष्यति गृहे पिता यस्याः समागतः।
अद्यैव ते गृहे त्वं हि दृष्टवान्तस्य विग्रहम्।। १९

ब्रूहि नैजां विचारणां गरीयान् विषयोऽधुना।
गोपनीया न भावना ब्रूहि निर्भय मनसा।। २०

स्मितिः स्पष्टं कपोलयोः दृष्टा तदा सुतस्य वै।
सुदर्शनोहि प्रोवाच श्रूयतां निश्चयो हि मे।। २१

सुतस्तेऽस्ति विवाहितः वर्षत्रयं गतं यदा।
आवां जातौ विवाहितौ गुप्तं वृत्तमिदं स्थितम्।। २२

न्यायालये विवाहोऽपिसम्पन्नोऽस्ति न गोपितः।
एम.ए. प्रथम वर्षे सख्यं जातं सुधामयम्।। २३

नाम्ना सा माधुरी देवी कर्मणापि तथैव सा।
विप्रवंशोद्भवा प्रिया मदर्थं प्राणदायिनी।। २४

आशिषामंगलायितं भवेद् वैवाहिकं कर्म।
परश्वः सा-गमिष्यति स्थातुमत्रैव निश्चितम्।। २५

स्व प्रकोष्ठे जगाम सः कलिपुत्रोहि दारुणः।
तस्मिन् दिने न भोजनं कृतवान् कतरोजनः।। २६

विद्वान् सुतो विजानाति सर्वं वृत्तंन गोपितम्।
तथापि मनसः शान्त्यै न तौ सकृदपि गतः।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तृतीये दिवसे प्रातः माता उच्चैः रुरोद ह।
दर्शंदर्शं पतिशवं स्वशिरस्ताडनं कृतम्।। २८

श्रुत्वा करुणरोदनं बहुजनाः समागताः।
निज प्रकोष्ठ संस्थितः विश्वस्तो हि स्थितः सुतः।। २९

क्रन्दनमुपवासश्च भविष्यति न संशयः।
किन्तु स्व प्रियभार्यया आगत्य कथितं यदा।। ३०

पितुः मरण दुःखदं संवादं जनतास्थितिम्।
तदा उच्चैः रुरोद ह सुतो लब्धुं दयां कृपाम्।। ३१

माधुरी सेवया जाता माता स्वस्था च जीविता।
ग्रामीणापि वदन्ति तां लक्ष्मीः साक्षात् समागता।। ३२

पितुः श्राद्धं समाप्य तौ प्राप्य मातुः समर्थनम्।
स्व कर्मणि रतौ जातौ महा विद्यालये निजे।। ३३

इति चतुर्थोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथपंचमोऽ ध्याय:

कृषिभूमि: प्रभूतासीत् स्वर्ण प्रसविनी सदा।
तेनैव कृषिद्रव्येण श्वसुरेण विनिर्मितम्।। १

विशालं भवनं त्वेकं लिलुआयां त्रिभूमिकम्।
प्रतिमासं ददाति यत् दश सहस्त्र रुप्यकम्।। २

शुल्कं वै तत्रवासिभि: आसीदाय: सुनिश्चित:।
एवमर्थ विषयेऽपि परिवारो मुदान्वित:।। ३

स्व पत्न्यासह माधुरी सुदीर्घ चिन्तनान्तरम्।
निर्माय योजनामेकां प्रसन्नाति बमूव ह।। ४

मातरि जीवितायां चेत् सुत: स्वयंभवेद् यदि।
सम्पूर्णाचलसम्पत्ते: स्वामी तेन भविष्यति।। ५

कार्यालयेषुगमनं कार्य सम्पादने सुखम्।
अनेन तौ हि लप्स्येते दास्यान्मुक्ति: सुदारुणात्।। ६

स्वतंत्रौ तौ भविष्यत: सुखिनौ च स्वजीवने।
किन्तु सुतस्तु संयात: मातृभक्त्या विकम्पित:।। ७

प्रोवाच माधुरीं वच: माता प्रशासिका मम।
अद्यावधि स्थिता हि या सहसा साऽनुशासिता।। ८

भविष्यति कथं वद सोढुं शक्तो स्मि नैवभो।
द्रष्टुं वै निजमातरं निजाधीनां कथंवद।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदा प्रोवाच माधुरी दुर्बल हृदयो भवान्।
यस्य पार्श्वेऽस्ति वैभवः स वै भवति शासकः।। १०

यस्मिन् दिने भविष्यति सर्वाधिकारवान्भवान्।
तस्मिन्नेव दिने मातुः हृत्परिवर्तनं ध्रुवम्।। ११

नाहं शक्तोऽस्मि हे प्रिये द्रष्टुं वै निज मातरम्।
दीनां च दासिकोपमां याऽऽ सीद्देवी समामम।। १२

अब्रवीन्माधुरी तदा दुर्बल हृदयो भवान्।
श्रृणु सत्यं वदाम्यहं तत्सुखदं भविष्यति।। १३

सन्ति वृद्धाश्रमा दिव्याः मथुरायां सुखावहाः।
तत्र सर्वं हि लप्स्यते माता तवातिधार्मिका।। १४

भोजनं च सुखावासं चिकित्सातु दिनेदिने।
प्रवचनं हि सन्तानां कृष्णलीला तु प्रायशः।। १५

श्रुत्वा चेदं प्रवचनं प्राप्तानन्दो भविष्यति।
पुत्रः सुदर्शनस्तदा हृदा ओमित्युवाच ह।। १६

पार्श्वस्थकक्षतस्तावद् सिंहिनीगर्जनं श्रुतम्।
उभौतौ घूर्णितौ जातौ पेततुर्नैव भूतले।।१७

स्व माता कालिकोपमा दृष्टा तदाति कोपिता।
कास्ति ते गुप्त मंत्रणा सर्वा श्रुता मयास्वयम्।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अद्यैव नैव नैवभो अधुनैव पलायताम्।
विद्वानस्ति जनोह्येष पुत्रो नैव तु नैवहि।। १९

आसुरी भाव सम्पन्ना केयं नारी नु राक्षसी।
सम्पत्त्यर्थं करिष्यति सर्वं कुकर्मजीवने। २०

नैव पुत्रवधूह्येषा न त्वं पुत्रोऽसिमेश्रृणु।
क्षणार्धं नैव तिष्ठतां गच्छतां यत्र रोचते।। २१

श्रुत्वेदं घोरगर्जनं पादयोस्तौ हि पेततु:।
अश्रु स्नातावुभौ जातौ वक्तुं नैव हि शेकतु:।। २२

भूमौ विलुण्ठनं तथा क्षमायाचनमेवच।
दृष्ट्वा क्रोध प्रशमनं शनैरुत्थाय माधुरी।। २३

वक्तुं किञ्चिदियेष सा बद्धकण्ठाति विह्वला।
निपतन्त्यश्रु विन्दव: कपोलाभ्यामुरोजयो:।। २४

क्रोधस्थाने तु वात्सल्य-मागतं सत्वरंतदा।
माता प्रेम्णैव प्रोवाच का वार्ता ब्रूहि सुस्पष्टम्।। २५

भीता मा भव पुत्रिके तदा प्राप्य नुजीवनम्।
वक्तुमियेष माधुरी किन्तु द्रुतं पपात सा।। २६

विक्षिप्ता मातृपादयो: तावदुत्थाय सस्मय:।
तां ब्रूते हि सुदर्शन: सत्यं वदतु मातरम्।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

माता मेऽस्ति दयावती सत्यं सत्यं निवेदय।
कुपुत्रः संभवो देशे कुमाता नैव संभवा।। २८

तावदुत्थाय माधुरी ब्रूते सा सुस्मयानना।
श्रुता वार्ता मया पथि विद्यालयं तु गच्छन्त्या।। २९

मामुद्दिश्य जनोह्येकः जनमन्यं यदुक्तवान्।
तदेव कथनं गृहे जातमभिनयात्मकम्।। ३०

विनोदाय प्रहसनं आवाम्यां सदने निजे।
कृतं तत्पापमूलकं जातं वै निज जीवने।। ३१

कुत्सिताऽभिनयं त्वेतद् पापमूलं न संशयः।
मातः प्रक्षालयिष्येहं पातकं यन्मयाकृतम्।। ३२

मातस्त्यजामि शिक्षणं श्व एव ममनिश्चयः।
अतः परंस्वंजीवनं तव सेवासमर्पितम्।। ३३

त्यजतां नैव शिक्षणं दीयतांहि सुशिक्षणम्।
महाविद्यालयेवृत्तिः नार्थाय गौरवाय वः।। ३४

एवं पुत्रवधूं माता सुतं चापि मुदाऽब्रवीत।
तदा तयोर्हि जीवनं जातं वै सुरक्षितम्। ३५

इति पंचमोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ षष्ठोऽध्याय:

दृष्ट्वा श्रुत्वा च कौतुकं नारदो हि सुदु:खित:।
ध्यानभंगो बभूवह प्राचलत् शिवमन्दिरात्।। १

मार्गे स चिन्तयामास द्रष्ठ्व्यो नु प्रशासक:।
यथा राजा तथा प्रजा कथनं शाश्वतं सत्यम्।। २

दिव्य दृष्ट्या तु दृष्टवान् भारतस्य प्रशासनम्।
वर्तते लोकतंत्रे हि प्रजानां सत्प्रशासनम्।। ३

यदि चेदत्र वर्तते लोकतंत्रं न द्रष्ठ्व्यम्।
छिद्रं कुत्रापि शासने शासितो वैं प्रशासक:।। ४

दुर्लक्ष्यो हि भविष्यति कदाचारो हि भारते।
तस्यान्त:करणं किन्तु स्पष्टं ब्रूतेंहि तं वच:।। ५

कलियुगो हि वर्तते भ्रष्टाचारस्य का कथा।
सुसंयोगो हि परमर्षे: कारागारस्य पुरत:।। ६

आंसीत्तदा हि नारद: वायुरूपधरोऽभवत्।
कारागारे स्थितान् जनान् ददर्श क्रमशोमुनि:।। ७

पशु भोजनलुण्ठक: पुरतो दृष्टिगोऽभवत्।
मूर्खीकृत्य निजान् जनान् लुण्ठितवान् हि सरलान्।। ८

जातिवादानुगोजन: भारभूतो भुवोध्रुवम्।
कलौ राजा बभूव ह धन्या: दण्डाधिकारिण:।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मंत्रालया हि विविधा: विविधास्तत्र मंत्रिण:।
पश्यन्ति निज कार्याणि कार्यालये निजे-निजे।। १०

हा धिक् किन्तु प्रशासका: नैव सन्ति समर्पिता:।
पदायतु समर्पणं न देशाय जनाय वा।। ११

जातिवादानुजीविन: हिन्दूधर्मासहिष्णव:।
लभन्ते जातिधर्मस्य मतं जयाय दुर्लभम्।। १२

स्तव्धो जातो हि नारद: वार्तालापो यदा श्रुत:।
सर्वेहि मंत्रिणस्तथा सर्वे वै कर्मचारिण:।। १३

आंग्लगिरा हि कुर्वन्ति कुत्रास्ति भारतं मम।
राष्ट्रभाषा न श्रूयते देवभाषा सुदुर्लभा।। १४

अत एव विवर्धते पापाचार: पदे-पदे।
आहारोऽ पि न: सात्विक: शाकाहारी पुरातन:।। १५

खाद्ये पेये ददर्शहि सर्वत्र विष मिश्रणम्।
दर्शं-दर्शं तु देशस्य दुर्दशां नारदो मुनि:।। १६

मनसि चिन्तयामास प्रथम चरणे कलि:।
अग्रे तु किंभविष्यति वक्तुं नैव हि पारये।। १७

कदाचार सिन्धौ निमग्ना हि सर्वे
जना भारतीया: सुखाद् वञ्चिता वै।
लभन्ते हि धिक्कारमात्रं स्वदेशे
कृतं रौरवं तै: स्वदेशो विदेश:।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न तातो न जातो न जाया सुतावा
कलौकोऽपि -विश्वासपात्रो हि जीवः।
कदा काम कोपानले ते विदग्धाः
विनष्टा कथामात्रशेषाभवेयुः।। १९

सुप्ते चाशिक्षिते लोके लोकतंत्रं भयावहम्।
एवं विधैवद्दश्यते दशा वै भारते वर्षे।। २०

धन-बाहुबलेन वा तथा ज़ातिबलेन च।
लब्ध्वा जनमतं देशे प्रशासनं हि कुर्वन्ति।। २१

यदा मानवा हीनभावांभिपन्नाः
न कुर्वन्ति मानुष्यकार्यं नृलोके।
तदादेवलोकात् समायाति दण्डः
क्वचिद्वात वर्षा क्वचिद्भूप्रकम्पः।। २२

न देशाय भक्तिर्नधर्माय भक्तिः
दया नैव दुःखाम्बुधौ पातितेषु।
स्वधर्माय खण्डात् विखण्डस्त्रिखण्डः
स्व देशो हि जातो विलज्जस्तथापि।। २३

स्वतंत्रे स्वदेशे हिरण्यस्य वृष्टिः
भवत्येव पश्यन्तु मंत्रालयेषु।
सुलुण्ठन्ति वीरा लभन्ते न मूढाः
सुभाग्येन मंत्रित्वमाप्तं यदि स्यात्।। २४
यदा मंत्रिभिः सार्धमात्मीयता स्यात्
तदा नास्ति भीतिर्हि न्यायालयात्ते।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुसंरक्षणं लभ्यते सर्वक्षेत्रे
जगज्जीवनं भूयते मंगलाय।। २५

न देवायभक्तिर्न देव्यै सुभक्तिः
न मात्रे सुभक्तिर्न पित्रे सुभक्तिः।
सदा कामिनी काञ्चनेष्वेन भक्तिः
अतो जीवनं यौवनं याति नाशम्।। २६

कथं लोकतंत्रं भवेदेधमानम्
यदा लोक-नेतृष्वमाङ्गल्यभावः।
भवेन्मंत्रिपुत्रो हि मंत्री न चान्यः
सदा शास्तृवंशो हि शास्तानु भूयात्।। २७

पश्यन्तु बाब्रज्यते नेतृवर्गः
हिंसापि बोभूयते गर्ह्यभावात्।
वरीवृत्यते नेतृवर्गस्तथैव
देशोपि जोहूयते पूर्वकीर्त्तिम्।। २८
इति षष्ठोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सप्तमोऽध्यायः

रौरव दृश्यम्

एकदा नारदो योगी वायुरूपधरोभ्रमन्।
कृष्णे पक्षे निशायां सः ददर्श दृश्यमद्भुतम्।। १

दिल्लीमहानगरे हि प्रधावन्तं बसयानम्।
तस्मिन्नासन् जनाः सप्त, युवानः सर्व एवहि।। २

तेषु मध्ये स्थिताह्यका युवतिर्वै स्मयानना।
वायुरूपो हि नारदः स्थितस्तत्र ददर्श ह।। ३

संकेतं प्राप्य मित्रस्य अशेत सा हि रल्लके।
ततः परं सखायो वै संभोगं हिप्रारभत।। ४

निमिल्य चक्षुषी तदा तत्र स्थितोहिं नारदः।
दीर्घकालान्तरे योगी यदाददर्श तां पुनः।। ५

तदातु पञ्चमोयुवा संभोगार्थं हि तां गतः।
तदा सा युवतिः दीर्घं चीत्कारं कर्त्तुमारभत।। ६

शीघ्रं तु बस चालकः यानं वेगेन चालितम्।
चीत्कारंयेन वै तस्याः अश्रुतं स्यात् पदातिभिः।। ७

सप्तपुरुष संभुक्तां म्रियमाणां हि तां जनाः।
मुदाप्रक्षिप्तवन्तस्ते तां तदा पथि मित्रञ्च।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येन सह समागता साऽऽ सीत् परम सुन्दरी।
अन्येद्यु: विवृतं जातं वृत्तमिदं भयावहम्।। ९

हृदय द्रावकंदृश्यं दृष्ट्वा मनसि चिन्तितम्।
आसीदेषा नु घटना अनाश्रुता हि भूतले।। १०

निर्भये निर्भये त्वं हता पापिभि:
मानवत्वं हतं हा हतं भूतले।
नैव कोऽपीह जन्तुस्तथा पातकी।
मानवो भूतले वै यथा दृश्यते।। ११

ग्रामजाता हि सा बालिका सुन्दरी
छात्रमित्रेणसाकं गता माधुरी।
संघबद्धा युवानो हि वै पूर्वत:
प्रस्तुता वै प्रतीक्षारता: संस्थिता:।। १२

श्वानश्चापि न कुर्वन्ति नृशंसं कर्म दारुणम्।
यथा चक्रुर्हि मानवा: पावने भारते भुवि। १३

मानवता हता दुष्टै: तै: सप्तनरराक्षसै:।
कालपृष्ठे हिं टंकितं जातं कर्म रौरवम्।। १४

भारते अभिभावका: सर्वदा सन्तु जाग्रता:।
बालिका रक्षणंकर्म-सर्वधर्म शिरोमणि:।। १५

रुदन्ति देशवासिन: मानवता नु रोदिति।
भूयान्नैवहिभारते घटनैतादृशी पुन:। १६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देशोऽ यं भारतं यत्र जातो रामश्च कृष्णश्च।
अतो हि कल्पनातीता घटनेयं न संशयः।। १७

जाग्रता किन्तु जिज्ञासा द्रष्टुं तथ्यं तु पूर्णतः।
स बूभव निशिचरः ज्ञातुं तथ्यं यथार्थतः।। १८

ददर्श प्रथमरात्रौ स दिल्ली नगरे मुनिः।
सहस्रशो हि पुरुषान् संभोग निरतान् जनान्। १९

नासीदावर्जनातत्र कुलस्यनैव वर्णस्य।
दशवर्षीय बालिका षष्ठिवर्षीय वृद्धेन।। २०

आसीत् संभोग निरता एकान्ते निर्जने स्थले।
समग्रे भारते रात्रौ दृश्यमेतं ददर्श ह।। २१

अहो किमेतदाश्चर्यं दृश्यते पुरतोऽ धुना।
ददर्श नारदो योगी मध्यरात्रौ परिभ्रमन्।। २२

दिल्ली दृष्ट्वा यदा मुनिः आसीत्पूर्वमुखस्तदा।
प्रासादं हि धनिकस्य सहसा दृष्टिसादभूत्।। २३

प्रासादाभ्यन्तरे नूनम् दुष्कर्म खलु भूयते।
दिदृक्षा तं निनाय वै वायुरूप धरं मुनिम्।। २४

सा चतुर्दश वर्षीया बालिकाऽतीव शोभना।
अध्ययने रतेव सा दृश्यमानाबभूव ह।। २५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किन्तु मनसि नैवासीत् अध्ययने रतिः ध्रुवम्।
तदा तस्या हि पितरौ क्रुद्धाविव समागतौ।। २६

पुत्र्याः कण्ठं स्वकरेण धृत्वा सा भूमिसात्कृता।
जाता श्वासावरोधेन श्वसनं कठिनं तस्यै।। २७

बाहुभ्यां साहि पद्भ्यां सा कृतवती प्रचेष्टनम्।
आत्मत्राणाय कालात्सा किन्तु माता दयावती।। २८

दृढाभ्यां स्वकराभ्यां वै निगडितौ सुता पादौ।
सा क्षणानन्तरं पुत्री गतश्वासा बभूव ह।। २९

दर्शं दर्शं तु सुन्दरीं बालिकां निहतां तदा।
बभूव शोक सन्तप्तः नारदो हि मुनीश्वरः।। ३०

मनसा प्रार्थयामास साश्रुनेत्रः कृताञ्जलिः।
प्रभो, दर्शयसि भुवि किमेतत्पाप पर्वतम्।। ३१

जग्मतुः पितरौ मुदा कक्षे निजे हि संलग्ने।
कृतवन्तौ मुदावार्तां पर्यंके बहु कोमले।। ३२

तत्रैव दृष्टवान्मुनिः निहतं तस्य सेवकम्।
पुत्र्या सह सुसम्बन्धात् जातो हि निहतो जनः।। ३३

विषयेऽस्मिन् चकार न विशेषालोचनं मुनिः।
यतो हि मनसाखिन्नः विषण्णोहि मुनीश्वरः।। ३४

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बालिके बालिके नैव लब्धा त्वया
जीवने मानवे शान्तिप्रीतिर्दया।
आहता व्याहता त्वं निजैर्वैजनैः
नैव दृष्टोहि कारुण्यभावस्त्वया।। ३५

बालिके ते सुरूपंहि कालायते
सुन्दरी कोकिला कामना रूपिणी।
जीवने मानवे मानवीया दया-
चन्द्रिका यामिनी नैवदृष्टिं गता।। ३६

ततो जातो हि व्यथितः संकल्पितो बभूव ह।
द्रक्ष्यामि नैव चक्षुषा दृश्यमेतद् घृणास्पदम्।। ३७

सत्समाचारपत्राणि अतः परं पठिष्यामि।
किन्तु हाधिक् नदृष्टवान् पत्रं किमपि निर्दुष्टम्।। ३८

प्रतिपृष्ठं तु दृष्टवान् घटनां बहुवचने।
दुराचारं भयावहं दृष्ट्वा जातोंहि नारदः।। ३९

विक्षिप्तेव प्रमत्तेव पलायनपरोऽभवत्।
कुशलंत्विदमेवासीत् वायुरूपधरोमुनिः।। ४०

न स दृष्टि गतोऽभवत् सामान्यैर्मानवैर्भुवि।
मार्गे तु दृष्टवान् मुनिःखाद्येपेये तु मिश्रणम्।। ४१
यदासीन्मानववधः गोहत्यां नारदो मुनिः।
दृष्ट्वा विक्षिप्त चेतसा पपाताधोमुखो हि सः।। ४२

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किन्तु भूमौ पपात न प्राप्तसंज्ञो भुविस्थित:।
बम्बईनगरे ह्यासीत् दृष्ट्वा जनान् सुविस्मित:।। ४३

परिधानं तु नैकस्य भारतीयं स दृष्टवान्।
किमहं लंदने स्थित: यतो नास्तिपरिधानम्।। ४४

भारतीयं तु कुत्रचित् वस्त्रेण न विभाव्यते।
क: पुमान् रमणी च का आश्चर्य चकितोऽ भवत्।। ४५

किंन्तु नैव तु नैव हि भेदोवै वर्तते ध्रुवम्।
स्तन केशवती नारीं कथ्यते भारते भुवि।। ४६

इदं वै भेदलक्षणं भविष्यति सहायकम्।
श्रुत्वा संभाषणं किन्तु चकित चकितोऽभवत्।। ४७

अजराऽमरभाषा या श्रूयते नैव कुत्रचित्।
ध्यानमग्नोऽ भवत्तदा देवर्षि: नारदो मुनि:।। ४८

नासीत् श्रवणगोचरा देवभाषाहि भारते।
आंग्ल विद्यालया दृष्टा समग्रे भारते तदा।। ४९

छात्रांस्त्वांग्ल परिधाने आंग्ल गिराप्रभाषणम्।
कुर्वन्ति बालका: बाला: सर्व विधंकुकर्म ते।। ५०

दृश्यमेकं ददर्शह नारदो-योग-विग्रह:।
महाविद्यालये निजे प्रधानाचार्य दुर्दशाम्।। ५१

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रुद्धैः छात्रसहस्रैः सः परिवृतो हि ताडितः।
छात्र संघ प्रमुखो हि तेनासीद्दण्डितस्तथा।। ५२

निष्कासितश्च तेनहि कदाचाराच्चतस्य वै।
अतो हि ताडितो जातः रक्त स्नातश्च पूर्णतः।। ५३

प्रधानाचार्य दुर्दशां दर्शं दर्शं रुरोद ह।
योगीश्वरो हि नारदः सत्यपक्षधराय वै।। ५४

निष्कासितो हि छात्रोऽ यं सत्तापक्षधरो युवा।
प्रशासनं हि पूर्णतः छात्र नेता सुरक्षणे।। ५५

कटिबद्धो ह्यदृश्यत सत्तापक्षधरस्य वै।
कल्याणो नैव संभवः अतः सत्यंरुरोदह।। ५६

प्रजातंत्रे तदा जाताः शिक्षालया नु पूर्णतः।
नेतानिर्माणशालेव संरक्षिताः प्रशासकैः।। ५७

गुरवो नैव गुरवः ते जाता वृत्तिजीविनः।
सदाचार-सुशिक्षणं शिशुमूर्खीकरणं हि।। ५८

श्रेष्ठा शिक्षा तु सा एव यस्यै लक्षं हि रुप्यकम्।
दीयते मूल्यरूपेण कोट्यधीशैर्जनैर्मुदा।। ५९

निःशुल्काल्पशुल्का वा शिक्षा नैव हि नैवहि।
भिक्षावृत्ति प्रदानं हि तस्या लक्ष्यं न चान्यथा।। ६०

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालश्रमहननं तत् अतस्तद्दूरतस्त्यजेत्।
द्रव्येन लभ्यते विद्या विद्ययालभ्यते धनम्।। ६१

अध्यापकोगुरुर्वा स्यात् सत्वस्ति सेवकस्तव।
पश्य धनं विजयते गुरुवादोहतोहत:।। ६२

रुरोदनारदो मुनि: दृष्ट्वा गुरुविनिन्दनम्।
न शशाक क्षणं स्थातुं ग्रामाञ्चलं जगाम स:।। ६३

इति सप्तमोऽ ध्याय:

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथाष्टमोऽध्यायः

ग्रामाञ्चल घटना

दृश्यं ग्रामाञ्चलस्यवै दर्शंदर्शं मुमोदह।
शान्ति स्तत्र हि सर्वत्र आसीदाह्लादकारिणी।। १

प्रसन्नात्मा तु गतभीः चिन्तयामास नारदः।
श्री रामस्य हि पावनी भूमिर्हिवर्त्तते प्रिया।। २

वासुदेवस्य पावनी क्रीड़ाभूमिः पुरः स्थिता।
कथं न पार्थिवतनुः गच्छेयम् येन रंजसा।। ३

भवेयं स्नातविग्रहम् सौभाग्यं परमं महत्।
कौशेय वस्त्रभूषितः वीणा हस्तो मुनीश्वरः।। ४

ग्रामे परिक्रमांकर्त्तुं चचाल मोदपूरितः।
दृष्ट्वा विचित्रमानवं श्वानास्तत्र समागताः।। ५

सर्वे वै बुक्कनं तदा तारस्वरेण रेभिरे।
आगत्यागत्य पार्श्वे ते चक्रुः रावं सुभैरवम्।। ६

भीतस्तैः कृन्तनान्मुनिः ग्रामीणस्य द्रुतं द्वारम्।
उपागच्छत्स सत्वरं श्वभ्यस्त्राणायवै द्रुतम्।। ७

श्रुत्वा रावं शुनां द्वारे गृहपतिः समागतः।
अति रोषेण नारदम् उक्तवान् निष्ठुरं वचः।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भिक्षु काणां समागमः नित्यं-नित्यं विवर्धते।
पश्य पुनः समागमः मरणाय भविष्यति।। ९

मया निवारिताः श्वानः स्वागतं न कृतं हि तैः।
पुनः समागते श्रृणु हास्पीटलं गमिष्यसि।। १०

नैव त्यक्ष्यन्ति कुक्कुराः स्वागतं ते करिष्यन्ति।
तेऽ पि जानन्ति मानवान् को गर्ह्यः कोहि सात्विकः।। ११

पश्य स्वस्थ शरीरोऽयं दयादानेन जीवति।
भिक्षाटनं वरं त्वस्मै श्रमादस्य पलायनम्।। १२

एवं विधैर्जनै देंशे दारिद्र्यं हि विवर्धते।
भर्त्सनीया गृहिण्यो नः सर्वाहि धर्मभीरवाः।। १३

एतदाडम्बरं ताभ्यः छलनाय सुभूयते।
अपूपं खादयन्ति ताः एतान् वै छद्मजीविनः।। १४

धर्मभीरु जनाः सुखं नित्यं भवन्ति छलिताः।
दौर्भाग्यं मम देशस्य पूज्यन्ते कर्म भीरवः।। १५

श्रावं-श्रावं तु गर्हणां जातो विचलितो मुनिः।
दिदृक्षा या हि ग्रामाणाम् अश्रुसिक्ता दिवंगता।। १६

ततः पश्चात्पदंगतः ग्रामाद् बहिः समागतः।
आम्रोद्यानं गतो योगी विश्रामाय क्षणंस्थितः।। १७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृक्षमूलेक्षणं स्थित: पक्वै: सुमधुरै: फलै:।
विनताश्च सुदर्शना: शाखास्तस्य मनोरमा:।। १८

ददर्श नारदो योगी भृशमानन्द पूरित:।
तावत् शुश्राव दारुणं शब्दं हि तस्य पालक:।। १९

गर्जन्समागतस्तत्र ज्ञात्वा चौर: समागत:।
वामतस्तु शुनांयूथ: दक्षिणतस्तु पालक:।। २०

प्राणरक्षातिकठिना आसीत्तदा महामुने:।
दृष्ट्वा नान्यं हि मार्गं स: वायुरूपधरोऽ भवत्।। २१

दर्शं-दर्शं हि तद्दृश्यं नारदेन विचिन्तितम्।
भृशं कष्टं तु वर्तते भारते ग्रामजीवनम्।। २२

शृगालरोदनं श्रुतम् अस्तंगते दिवाकरे।
आसीद्भयावहाध्वनि: शृगालानां न संशय:।। २३

शृगालध्वनि विज्ञाता ग्रामस्य पण्डितो ऽ वदत्।
भौतिकं हि भयावहं संकटं लक्ष्यते ऽ धुना।। २४

शंखनादं प्रकुर्वन्तु घण्टानादं पुन: पुन:।
रामध्वनि प्रपूरितं भवेद् ग्रामान्तिकं नभ:।। २५

एतस्मिन्नेव कालेतु ग्रामीण: स समागत:।
यस्य गृहे समायात: वीणाहस्तो हि नारद:।। २६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेनोक्तं मे गृहे नूनं प्रेतात्मा हि समागत:।
तावदेव समायात: आम्रोद्यानात्समानव:।। २७

आम्रोद्यानस्य पालक: तेनोक्तं हि मया दृष्ट:।
योगिवस्त्रावृतो जन: मिठवा वृक्षपार्श्वस्थ:।। २८ (ग्राम्यनाम)

श्रुत्वा कोलाहलं मम अन्तर्ध्यानोबभूव स:।
तावदेव शृंगालानां रोदनं सहसोत्थितम्।। २९

दृश्यं भयावहं जातं संध्यां जाता सुभीषणा।
तावदेव पण्डितंस्य तत्परता मया दृष्टा।। ३०

शंखध्वनिं चकार स: प्रतिगृहं शंखध्वनि:।
घण्टाध्वनिस्तु मन्दिरे सहसैव व्यवर्धत।। ३१

अदृश्यरूप संस्थित: श्रुतवान्नारदो मुनि:।
भयार्त्तो हि महायोगी ब्रूते मनसि सुस्पष्टम्।। ३२

वरं नगरे वासो नहि नहि तु ग्रामे निवसनम्
जना: खलु ग्रामीणा: सकलसुखहीनाभयभरा:।
न वै सुखदावासो न च सुखदवृत्तिर्हि सुलभा
जना ननु ग्रामीणा निजपरविचारेण निहता:।। ३३

इति अष्टमोऽ ध्याय:

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ नवमोऽध्यायः

ग्रामाणां भारते दशां दृष्ट्वा खिन्नोति नारदः।
लब्धुं शान्तिं हि मानसं न्यायालयं जगाम सः।। १

वायुरूप धरोह्यासीत् अदृश्यो देह धारिभिः।
द्रष्टुं त्वनावृतं सत्यं न्यायालयस्य भारते।। २

बलिया नगरे गतः प्रदेशेचोत्तरे शुभे।
कृष्णवस्त्रावृताः सर्वे जाता वैदृष्टिगोचरा।। ३

न्यायस्य भारतीयस्य वेत्तारोवै विभूषिताः।
कृष्णवस्त्रेण वै सर्वे यमदूतेव लक्षिताः।। ४

न्यायालयो यमलोकः दूता वै कर्मचारिणः।
दृष्ट्वा वेशं भयावहं भीताः स्युस्ते कुकर्मिणः।। ५

अतएव हि भारते न्यायवीरा विचरन्ति।
कृष्णवस्त्रावृता निजे कार्ये कार्यालये ऽपि च।। ६

स्थाने-स्थाने तु दृष्टवान् जनान् यूथेषु संस्थितान्।
आपण सदृशंदृश्यं दृष्ट्वा कौतूहलो ऽभवत्।। ७

जिज्ञासुर्नारदो ऽप्यगात् ददर्श दारुंण दृश्यम्।
न्यायाय ये समागताः आसन् ते कथिता दृढम्।। ८

निजाधिकार लाभाय दण्डाद् वा त्राणहेतवे।
इयत् सहस्त्र रुप्यकं भवता देयं भविष्यति।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्यथा तु भविष्यति कारावासो हि दारुण:।
अर्थदण्डो भविष्यति द्वयमेवाप्य संशय:।। १०

उपायेन तु केनापि कुरु प्रबन्धमर्थस्य।
अत: परं तु नारद: गतो द्वितीयमापणम्।। ११

अत्रासीन्न्याय क्रेतैक: वार्तालापे सुसंलग्न:।
मन्दस्वरेण मंत्रणा गरिष्ठ विषये श्रुता।। १२

कुट्टनीकर्म निरतो जनो ह्यन्यं समब्रवीत्।
जनस्यास्य सुसंपर्क: न्यायाधीशेन वर्त्तते।। १३

यदि चेद् याचितं द्रव्यं दीयते पूर्वमेव हि।
तदा तु विजयो ध्रुवम् भविष्यति न संशय:।। १४

ततो हि न्यायक्रेता तं पुरुषं हि समब्रवीत्।
एवमेव भविष्यति द्रव्यं दास्ये सुनिश्चितम्।। १५

किन्तु विश्वासहेतवे बन्धूनां किं करिष्ये ऽ हम्।
न्यायविद्भि: सहायार्थं यदि किञ्चिन्न दीयते।। १६

यदि चेन्मयि विश्वास: यथा दिष्ट स्तथा कुरु।
ओम् ओम् सर्वं करोमि भो यथा दिष्टो ऽ स्मि श्रूयताम्।। १७

एतस्मिन्नेव काले तु युवक: समुपस्थित:।
तेनसह समागता सुमुखी च सुलोचना।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवाहार्थं तु पावने न्यायालये स्मयानना।
अधिवक्ता समागतः कृष्णाम्बरो हि पण्डितः।। १९

याचितां दक्षिणां दत्वा अधिवक्त्रे मुदान्वितौ।
तत्रत्यकर्मकरेभ्यः ददतुः दक्षिणां मुदा।। २०

क्षणं विचलितो जातः नारदो मुनिसत्तमः।
किमहमस्मि भारते ब्रिटेन नगेर ऽ थवा।। २१

न्यायमूर्तिं हिसंद्रष्टुं प्राविशन्न्याय मन्दिरम्।
पक्षेण प्रति पक्षेण कृष्णवस्त्र धरौस्थितौ।। २२

पक्ष विपक्षवक्तारौ उभौतावर्थजीवनौ।
आसीत्संग्राम भीषणं नूनं तद्धन भाषणम्।। २३

अनाश्रुतमद्यावधि नारदाय महात्मने।
न्यायमूर्तिस्तदा ऽ ब्रवीत् अमुकदिवसे पुनः।। २४

विचारणा भविष्यति विश्रामोदीयते मया।
घोषणां श्रुतवान्यदा न्यायपक्षे स्थितो जनः।। २५

मन्दस्वेरण प्रोवाच मित्रमेकं समागतम्।
कदा न्यायं हि लप्स्ये ऽ हं ज्ञातुं नैवहि पारये।। २६

अर्थदण्डो हि दीयते सत्यपक्षधरायवै।
रोरुद्यते मनो हि मे दृष्ट्वेदं कलिनर्तनम्।। २७

इति नवमोऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ दशमोऽध्याय:

परं खिन्न: खिन्न: विचरति मुनि: भारत भुवि
दिद्दक्षा वै तस्या गमयति मुनिं भारतभुवाम्।
अयोध्यायां गन्तुं हरिनिलय द्रष्टुं रुचिरभूत्
बभूवास्मै शीघ्रं रुचिरनगरं नेत्र-पथगम्।। १

दृष्ट्वा स्नात्वा च नेत्राभ्यां पावनीं सरयू नदीम्।
परमानन्दितो जात: नारदो मुनिसत्तम:।। २

जन्मस्थलीं ननाम ह श्रद्धाश्रुपूरितो मुनि:।
किन्तु भिया विकम्पित: सहसा नारदोह्यभूत्।। ३

विशालं मस्जिदं तत्र श्रीरामभवनस्थले।
दृष्ट्वा विंचकितो ऽ भवत् नारदो हि मुनिश्रेष्ठ:।। ४

विशालजन सम्मर्दं ददर्श तत्र नारद:
जगाम दृश्यवपुषा यदाशुश्राव गर्जनम्।। ५

यत: श्रीराम भक्तास्ते जयकारेण रामस्य।
श्रावयितुं प्रशासकं निजाह्वानं समुत्सुका:।। ६

श्रीरामस्य सुभवनं निर्मितं स्यान्निजस्थले।
श्रीरामजय कारेण आसन् दिश: प्रपूरिता:।। ७

पावनेखलु कार्ये ऽ स्मिन् सहयोगोहि कर्त्तव्य:।
इदं विचार्य नारद: भौतिकवपुषा गत:।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किन्तु हा धिक् महत्कष्टं जातं किमिह हे मुने।
पुलिस दण्डाघातेन पपाताधोमुखो मुनिः।। ९

रामभक्ताः समागत्य निन्युस्तमुपचाराय।
जाति विशेषतोषणं प्रशासने हि दृश्यते।। १०

निशीथे तु समागते बभूव चिन्मयो मुनिः।
जातः प्रसारितः प्रातः रात्रौ रोगीपलायितः।। ११

दृश्यमेवंविधं देशे लब्धुं बहुमतं खलैः।
नारदेनसमो योगी ताड्यते राजपुषैः।। १२

उद्देश्यो पि न गर्हितः राममन्दिर निर्मितिः।
जाते हि मनसा स्वस्थे नारदेन विचारितम्।। १३

इदानीं प्रभुकृपया नूनं जातो हि रक्षितः।
पुनः रामाय संघर्षे जीवितो न भविष्यसि।। १४

शरीरं पार्थिवं त्यक्त्वा चिन्मयं स बभूव ह।
जगाम शासकगृहं श्रोतुं वार्तां हि सुस्पष्टम्।। १५

मुख्य मंत्री प्रदेशस्य आसीत् संभाषणे रतः।
समागताल्प संख्यक-प्रतिनिधिजनैः सह।। १६

विश्वस्ताः पूर्णतः जाताः सर्वेते ये समागताः।
मुस्लिमानां क्षति नैव भविष्यति न संशयः।। १७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्ट्वा श्रुत्वा च वृत्तान्तं रुरोद नारदो मुनिः।
किन्तु योगी तु नैवासीत् दृष्टि श्रुति सुगोचरः।। १८

ददर्श नारदो योगी सर्वं दृश्यं नरगस्य।
श्रीराम जन्ममन्दिरं स्थितं तुच्छायितं तत्र।। १९

यत्रोन्नतं विशालं च मस्जिदं बाबर स्यासीत्।
स्वतंत्रे भारते जाते विवशं राममन्दिरम्।। २०

नारदेन विचारितं न युक्तं कालयापनम्।
भ्रमणं भारते ऽ धुना संकटाय भविष्यति।। २१

गतो गतो दूरमहो स्वधर्मः
त्यक्त्वा स्वदेशं प्रियभारतं सः।
कलिं समायान्तमहो नुदृष्ट्वा
स्थातुं न शक्तो भुवि भारते सः।। २२

अतो विनष्टे ऽ पिहि रामगेहे
भक्ता न दृष्टः कुपिताश्च रौद्राः।
कथं कथं राम निवासनष्टे
नष्टा न जाता भुवि राम भक्ताः।। २३

पलायतां पलायतां भारतात्पलायताम्
कुकर्मिणो विधर्मिणः पुण्यभूमिभारते।
कलौ समागता जना नैव सन्ति साधवः
पलायनाय तत्परो दृष्टिगो ऽ भवन्मुनिः।। २४

इति दशमोऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथैकादशोऽ ध्याय:

बंगेषु कोलकातायां परिभ्रमन्हि नारद:।
आसीदतीव संतुष्ट: दृष्ट्वा भव्यं सुनगरम्।। १

धौतानि भवनान्यासन् रमणीयानि पूर्णत:।
सहसा किन्तु शुश्राव रमणी क्रन्दनं पथि।। २

जातो योगी प्रकम्पित: वायुरूपधरोऽ भवत्।
यूनस्त्रीन् ददर्शह एकां वै षोडर्शी तथा।। ३

चतुर्थो हि युवा तदा संभोगार्थं हि प्रस्तुत:।
चतुर्थस्य हि दर्शनं यमदूतस्य दर्शनम्।। ४

प्रार्थयतिस्म युवति: युवानं तं दयां कुरु।
अत: परं तु संभोगो मरणाय भविष्यंति।। ५

आसीदत्यद्भुतंदृश्यं नारदाय स्वजीवने।
मनश्चकार देवर्षि: रक्षितुं तां हि बालिकाम्।। ६

युवा रूपधरो मुनि: यावद् गच्छंति तां तावत्।
मुनिं हन्तुं त्रयोजना: दृष्टा: शस्त्रधरा: सर्वे।। ७

मुंनिमभि मुखं ययु: वायुरूपं गतोमुनि:।
अन्यतमोऽ ब्रवीत्तदा किमाश्चर्यं पलायताम्।। ८

तावदेव समायाता आरक्षिणां तु वाहिनी।
ददृशुस्ते विलपन्तीं विनग्नां युवतीं भुवि।। ९

तामुत्थाय स्ववाहने ते चिकित्सालयं निन्यु:।
परीक्षिता चिकित्सकै: बहुभुक्ता प्रमाणिता।। १०

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विक्षिप्ता हतचेतना वक्तुं नैव शशाक सा।
नामानि वैदुरात्मनां अन्येद्युः सा दिवंगता।। ११

सासीद् दशम कक्षायाः छात्रा विद्यालय स्य वै।
तस्य महानगरस्य तस्याः नाम कुलस्य च।। १२

ग्राम जनपदस्य च सर्वं ख्यातिमवह।
ददर्श नारदो योगी दृश्यमति भयावहम्।। १३

नैव रेमे मनस्तस्य नगरे ऽ स्मिन् विभीषणे।
तथापि तस्यजिज्ञासा आकर्षिका बभूव ह।। १४

वायुरूपधरोमुनिः चचार सर्वतोदिशि।
खाद्ये-पेये च मिश्रणं दृष्ट्वा चकम्प देवर्षिः।। १५

ओषधीष्वपि मिश्रणं दर्शं दर्शं रुरोद ह।
अहो धन्या इमे जनाः सर्वे वै विषभोजनाः।। १६

पीत्वा मानवरक्तं तु सर्पोऽपि द्यां गमिष्यति।
प्रदूषितं हि भोजनं जननी दुर्विचारस्य।। १७

जातौवै दुर्विचारस्य प्रवाहो दारुणो भुवि।
विचारः कर्मप्रेरकः कुकर्म पथोग ह्यतः।। १८
समाजो दृश्यते ऽ धुना विचारे परिवर्तनम्।
यदतीव हि दुष्करम् यथाराजा तथा प्रजा।। १९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कथनं शाश्वतं सत्यम् नेतारो हि कलौयुगे।
दृश्यन्ते सर्वतो भ्रष्टा: नेता नाम धरा जना:।। २०

क्रियन्ते कर्दमायिता: प्रशासने हि सन्ति ये।
त एवहि नवैर्नवै: प्रहारै: क्षतविक्षतान्।। २१

मिथ्यारोपै र्हि कुर्वन्ति सज्जनान् कर्दमायितान्।
भविष्यन्ति विपक्षिण: मिथ्यारोपैर्भुजबलै:।। २२

प्रभूतं स्वधनं नास्ति स्वदेशेकृष्ण कर्मणा।
गोपितं वर्त्तते सर्वं विदेशेषु खलैर्जनै:।। २३

कथं नैव दैव: समायाति त्रातुम्
सदा सज्जनानन्ददाता मुरारि:।
प्रहारै: शतै: पीड़िता ये हि सन्ति
खलैर्दुष्ट भावाभिपन्नैर्हि देशे।। २४

अहो रामकृष्णस्य देशो हि पूत:
सुभाषस्य देशो विवेकस्यदेश:।
खलैर्दुर्बिनीतैर्कदाचारमग्नै:
स्वदेशे ऽ पि संतप्यते देशभक्त:।। २५

किन्तु

निराशा निशा नैवशक्ता कदापि
समाच्छादितुं तं ह्युदन्तं दिनेशम्।
दिनेशस्य दिव्यां प्रभां पश्य प्राच्याम्
समायाति तामिस्र निक्षिप्य जालम्।। २६

समाप्त: एकादशो ऽ ध्याय:

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथद्वादशोऽ ध्याय:

आसीदेको हि धर्मात्मा मानव: पुण्यदर्शन:।
गंगातटे हरिद्वारे भक्तान् संबोधने रत:।। १

जिज्ञासां निजभक्तानाम्श्रावं-श्रावं जगाद ह।
श्रूयन्तां समुपस्थिता: सर्वे वैधर्मरक्षका:।। २

धर्मोऽस्माकं सनातन: विनाशं नैव यास्यति।
भवेयुर्देशनेतारो हिन्दूंधर्मासहिष्णव:।। ३

किन्तु तेषां कुचक्रेण क्षताङ्गो न भविष्यति।
सनातनो हि यो धर्म: स्थास्यति स सनातन:।। ४

धृति: क्षमा दमोऽ स्तेयं शौचमिन्द्रिय निग्रह:।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।। (मनु.) ५

दृढोऽयं मानवोधर्म: दशस्तम्भैर्धृतो दृढै:।
शाश्वतोऽ यं सनातन: अत एव कथ्यते जनै:।। ६

दु:खं मास्म गम: सखे श्रुत्वा दुष्कर्म दारुणम्।
जातोऽ हमपि विक्षुब्ध: श्रुत्वा सन्तस्य दुर्गतिम्।। ७

कारागारे हि निक्षिप्त: जातो योगी हि भारते।
काञ्चनकामिनी संग: विषतुल्यो हि कथ्यते।। ८

त्यक्तासक्तिर्न चेदस्ति योगी पतति कल्मषे।
अतो वै पतितो जात: सपुत्र: पापकर्दमे।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुसन्ता भारते सन्ति विरक्ता: सुख भोगत:।
सुलग्नामोक्ष साधने देव दुर्लभकर्मणि।। १०

सर्वकारविरोधिन: दण्ड्यन्ते दृश्यतेऽधुना।
किन्तु दुष्टं प्रशासनं लभन्ते कंस दुर्गतिम्।। ११

किन्तु

अहो कष्टं महत्कष्टं श्रूयते दक्षिणे ध्रुवम्।
स्वामी य: लक्ष्मणानन्द: शिक्षासंस्कृतिरक्षक:।। १२

संचालकश्च जनक: विद्यालय समूहस्य।
निहतो व्याहतो जनै: ख्रैष्टमतावलम्बिभि:।। १३

काननेवनवासिन: धन धान्यबलेन वै।
क्रियन्ते तै: स्वपथगा: वृत्तं नैवास्ति गोपितम्।। १४

तथापि

सुविज्ञातेऽपि कारणे मृत्यो वै स्वामिनस्तदा।
न जाता दण्डिता जना: सर्वकारेण भारते।। १५

समाजधर्म हेतवे प्राणहोता यशोधर:।
श्रद्धांजलिम् नलब्धवान् निजानां भारतेध्रुवम्। १६
शम: शत्रौ च मित्रे च तथा मानापमानयो:।
शोभते साधवे नैव प्रशासकाय कुत्रचित्।। १७

दर्शं दर्शं तु दुर्दशां हिन्दूनां निज भारते।
स्थितिं तेषां तु करुणं रुरोद नारदो मुनि:।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गंगासागरयात्रिभिः करोदेयोऽस्ति न दया।
तत्रैव हजयात्रिभ्यः वायुयानार्थ दक्षिणा।। १९

हिन्दुस्ताने न हिन्दूनां महत्वं वै तथा यथा।
अन्यधर्मावलम्बिनां भविष्यं पठ्यतां निजम्।। २०

हिन्दुष्वपि हरिजनाः यादवाश्चान्त्यजाः सर्वे।
वरीया मतलाभाय गरीयाः स्वार्थ साधने।। २१

ब्राह्मणेष्वपिं विंप्रत्वं दृश्यते नैव कुत्रचित्।
पौरोहित्ये तु ये सन्ति त एव हि पण्डिताः।। २२

किन्तु तेष्वपि पाण्डित्यं सौभाग्येन हि दृश्यते।
पण्डिताः स्व कलत्रेण रमन्ते महिषा इव।
पुत्रस्योत्पादने दक्षा अदक्षा मुक्ति साधने।।
सत्यं सत्यं हि दृश्यते व्यासस्य वचनं त्विदम्।।। २३

क्षत्रियाश्च तथा वैश्याः आंग्लायन्ते मुदासर्वे।
एवं स्वभारते वर्षे लुप्तप्राया स्व संस्कृतिः।। २४

जन्मदिवस पालनं आंग्लगिरा च विधिना।
क्रियते भारतीयैर्हि कृत्वा मोमुद्यते गृहे।। २५

मूढास्ते नहि जानन्ति भारतीयां परम्पराम्।
जातेयं भारते तथा गृहीता परदेशिभिः।। २६

पश्य पश्य हि गर्हितं दृश्यं ते पुरतः सखे।
दृश्यमभारतीयं हि भैरवं कलिनर्तनम्।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुत्रस्तातायते मुदा पिता पुत्रायते ऽ वशः।
आंग्लवेशीय पुत्रस्य विवशः सेवकायते।। २८

आंग्लवेशे निजासाने सुखासीनो हि तनयः।
पादप्रान्ते स्थितः पिता चर्मकारेव दृश्यते।। २९

स्व सुतोपानहौ मुदा भीत्या वा मार्जनेरतः।
दृष्ट्वा दृश्यं तु रौरवं विक्षिप्तो ऽति रुरोदह।। ३०

नारदो हि मुनीश्वरः स्व शिरस्ताडितं मुहुः।
चकार हत चेतनः चीत्कारं येन कम्पितः।। ३१

स्वर्लोकोऽपि बभूवह महेन्द्रोऽपिनिपतितः।
निजासनात्तदा गुरुः दिव्य दृष्ट्या तु दृष्टवान्।। ३२

लीलां वा दुर्दशां मुनेः सान्त्वयामास निर्जरान्।
भुवि समागतो मुनिः धैर्यं दधार नारदः।। ३३

आसीदेको जनस्तत्र समाचार पत्रकरः।
जनमन्यं प्रदर्श्य सः अवदत्पार्श्वसंस्थितम्।। ३४

जनमन्यं विषादेन किं पठामि तु भो मित्र?
पत्रमेतत्सुदारुणं प्रतिपृष्ठं तु दृश्यते।। ३५

बलात्कारस्य घटना दृश्यते बहुवचने।
अन्योजनो तदोवाच स्वदेशो नैव शिक्षितः।। ३६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्ति पुराण पंथीय: पाठ्यते यत्र पुस्तके।
मातृवत्पर दारेषु अतो न दृश्यते सुखम्।। ३७

आवर्जना हि सर्वत्र भोजने शयने तथा।
संभोगे तु विशेषत: इदमेवतुकारणम्।। ३८

बलात्कारे विशेषत: जीवनं रौरवं कृतम्।
कुर्वन्तु मुक्त संभोगं शान्तं सर्वं भविष्यति।। ३९

बलात्कारस्य कारणे नष्टे जाते हि भारते।
पूर्ण शान्तिर्भविष्यति बलात्कारस्य घटना।। ४०

अश्रुता वै भविष्यति देशो विकसितो भवेत्।
मूर्खा वै पण्डितां देशं कुर्वन्ति कर्दमायितम्।। ४१

दृष्ट्वा श्रुत्वा च गर्हणां ऋषीणां भारते भुवि।
तस्तत्सो हि नारद: पलायनपरोऽ भवत्।। ४२

इति द्वादशो ऽ ध्याय:

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ त्रयोदशोऽ ध्यायः

एकस्मिन्दिवसे मुनिः राजधान्यां परिभ्रमन्।
ददर्श सुन्दरं तथा विशालं राजमन्दिरम्।। १

वायुरूपधरोमुनिः संचरन्हि ददर्श ह।
प्रधानसचिवं तत्र वार्तारतं हि केनचित्।। २

जिज्ञासुर्हि जगाम सः श्रोतुं वार्तां हि स्पष्टतः।
आसीत्समागतो जनः धनपतिः समादृतः।। ३

स शत कोटि रूप्यकम् सचिवायद्रुतमंदात्।
सचिवो ऽ पिद्रुतं तस्मै पत्रमेकं ददौ तदा।। ४

दर्शयामास पत्रे सः हस्ताक्षरं तु मंत्रिणः।
उक्तवान्हि प्रसन्नात्मा यत्नेन मम हे सखे।। ५

जातं कार्यं सुसंपन्नम् लक्षकोटिं भवान्मुदा।
भुंक्ष्व भोजय सम्मुदा यथा ते रोचते भवान्।। ६

तदा ब्रूते धनपतिः प्रधान सचिवं मुदा।
मया स्वकोषतो दत्तं रुप्यकं निखिलं प्रभो।। ७

भवता निखिलंधनं देशस्य हि समर्पितम्।
किन्तु किन्त्वब्रवीत् स वै नास्ति सर्वं ऋणुमम।। ८

अर्धं देयं हि मंत्रिणे शेषार्धेन शतं जनाः।
तैर्हि संरक्षणं लप्स्ये प्रहारैर्हि विपक्षिणः।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कदाचाराधातैर्मथितव्यथितो वै मुनिवर:
द्रुतं प्रागात्प्राच्यां प्रथितप्रथितंवै सुसदनम्।
गुणीनामागारं विपुल विशिपं वै हि नगरे
सरस्वत्यागारं ध्वनितध्वनितं छात्र बहुलै:।। १०

दृश्यमत्रापि नैवासीत् मुनये रुचिवर्धकम्।
छात्रौ विद्यालयाद् दृष्ट्वौ साश्रुनेत्रभावुभावपि।। ११

उभौ निष्कासितावास्तां शिक्षा शुल्काप्रदानत:।
एकोब्रूते निजं भित्रं वृत्तिहीनो ऽ स्ति मे पिता।। १२

वृत्या तु लिपिक: आसीत् भ्रष्ट विद्यालये ऽ शुभे।
प्रबन्धक कदाचारे सहयोगं न दत्तवान्।। १३

अनेन कुपितो जात: प्रबन्धको महाबल:।
चकार वंचितवृत्ति: पितरं मे हि निर्दय:।। १४

माता मे ऽ स्ति सुकर्मठा तस्या हि श्रम सीकरै:।
भोजनं लभ्यतेऽ धुना तातो ऽ पि मे शनै: शनै:।। १५

वृत्ति लब्धुं प्रचेष्टते आशा स्महे पुन: वृत्तिम्।
शीघ्रमेव हिलस्यते तदा विद्यालये पुन:।। १६

एवं मित्रे ब्रूवत्यसौ द्वितीयो बालको ऽ वदत्।
ममापि भो गृहस्थिति: नास्ति सुखावहाऽ धुना।। १७

मातृस्नेहं मया नैवलब्धं कदापि जीवने।
यतो माता दिवं गता त्यक्त्वा मां सार्धवार्षिकम्।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्येष्ठा मे भगिनी प्रिया आसीन्मातृ समा भुवि।
तया संपोषितो ऽ भवत् हतभाग्यो हि बालक:।। १९

पितरं त्वं विजानासि सफलो ऽ ध्यापकोहि य:।
प्रात: गच्छति पाठितुं प्रत्यहं सप्तवादने।। २०

आगत्य नव वादने स पाचयति भोजनम्।
प्रात: सायं द्वयोर्द्वयो: गृहेषु पाठयत्यसौ।। २१

श्रमाधिक्येन तस्य वै स्वास्थ्य हानिर्हि जायते।
दौर्बल्यं बर्धते नित्यं चिन्ता मे हि विवर्धते।। २२

मदीयां दु:स्थितिं दृष्ट्वा शुल्कमुक्तिं हि दत्तवान्।
तथापि तु परीक्षाया: शुल्कं मया नु दातव्यम्।। २३

तदेव न मया दत्तम् निष्कासनमत एव।
अस्ति सुसज्जनो ह्येक: साहाय्यं स दास्यति।। २४

किन्तु वार्षिक परीक्षा वंचिताछात्रा हि वद।
वर्षैकस्य हि कालस्य दण्डं सोढुं हि विवशा:।। २५

मानवता हता हता न दरिद्रा पिशाचिनी।
सा हता स्वार्थ पूरितै: निर्दयै: बुद्धिजीविभि:।। २६
श्रुत्वा विलपनं तयो: छात्रयो: नारदो मुनि:।
मथितो व्यथितो जात: द्रुतं दूरं जगाम स:।। २७

किन्तु स्वल्पेन कालेन विचारे परिवर्तनम्।
नारदस्य समायातं दिदृक्षु: स जगामह।। २८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्यं विद्यालयं ततः कालेनाल्पेन दृष्टवान्।
दिव्यं विद्यालयं पुरः कार्यालये जगाम सः।। २९

तत्रासीदभिभावकः सम्पन्नो वेशभूषया।
सहस्रद्वयरूप्यकं दत्वा प्रार्थितवानसौ।। ३०

नामांकनं सुतस्य मे दशमे कुरूताम् प्रभो।
जन्मतिथिं यथायोग्यं लिखित्वा हि प्रचेष्टनम्।। ३१

भवताभूरि तु कर्तव्यं परीक्षायां सुखावहम्।
अंकं प्राप्नोतु मे सुतः तदर्थं तु भवानपि।। ३२

द्रव्यं प्राप्स्यति भूरिशः एषा ऽ स्तिमम घोषणा।
प्रधानाचार्यः अलम्लं न वक्तव्यं सर्वं सर्वं भविष्यति।। ३३

सर्वमर्थेन साध्यते गृहे तिष्टतु ते सुतः।
परीक्षार्थं न चिन्ता स्यात् भवती वा सुतस्य ते।। ३४

दृष्ट्वा तु भ्रष्टं सकलं समाजम्
बभूव दुःखेन वितप्तगात्रः।
विद्यालये वा मदिरालयेषु
ददर्श भेदं नहि योगिराजः।। ३५

इति त्रयोदशो ऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ चतुर्दशोऽ ध्याय:

मनसि चिन्तयामास योगिराजो हि नारद:।
एवं मानवरूपेण गमनं नैव शोभनम्।। १

कालश्रमवृहत्क्षति: फलमल्पं हि लभ्यते।
प्रयागे तिष्ठतु मन गंगायमुन संगमे।। २

ततो विष्णु प्रसादेन निखिलं भारतं मुदा।
दर्शं-दर्शं हि पूर्णत: एक चित्तो हि भूयताम्। ३

निश्चिकाय यदामुनि: एकस्थ: संगमे ऽ भवत्।
तदा सर्वं हि वृत्तान्तं जातं तस्मै सुविवृतम्।। ४

अहो कष्टं महत्कष्टं जातं तस्मै हि मुनये।
निखिलंभारतं जातं द्दष्टिगं श्रुतिगं तदा।। ५

ददर्श करुणं द्दश्यं कथने कष्टदायकम्।
आसीदेको हि कामुक: त्रिपञ्चांशद्धि हि वर्षीय:।। ६

सार्धचतुर्वर्षीयया बालिकयासह खल:।
कुकर्मणि बलात्कारे निरतोमद्यपेव स:।। ७

आसीत्शून्यं गृहं येन साहाय्ये न समागत:।
पुरुषस्तत्र कोऽ पिवै रक्तस्नाताममार सा।। ८

युगपद् द्दष्टिगो ऽ भवत् देहली नगरे ऽ परम्।
जघन्यं द्दश्यमपरं संभोग निरतोजन:।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आसीत्स राक्षसोपम: सार्धवर्षीय बालिकाम्।
शिश्नाघातेन हतवान् किन्तु तस्यहि रोदनम्।। १०

श्रुत्वा जना: समागता: तमपि नरराक्षसम्।
जघ्नुस्ते कुपिता जना: श्रुत्वा जघन्य कारणम्।। ११

औषधं गर्भरोधकं संप्राश्यचाविवाहिता:।
स्वीय छात्र मित्रै: सह व्यभिचारं हि कुर्वन्ति।। १२

छात्राभि: सह छात्राणां समूहगायनं मुदा।
दृश्यते श्रूयते सर्वै: छात्रैश्चाप्यभिभावकै:।। १३

यस्त्वदीय: स मदीयोऽपि
या त्वदीया सा मदीयाऽपि।
यो मदीयो स त्वदीयो ऽ पि
या मदीया सा त्वदीया ऽ पि।
दृश्यते श्रूयते ऽ पि च सर्वमेतद् गृहे-गृहे।
यत: सर्व गृहेष्वद्य वर्तते दूरदर्शनम्।। १४

दारुणवार्ता

अहो दृष्टिश्रुतिगतं जातं करुणकरुणम्।
आसीदेक: कलिपुत्र: पितुस्त्रिभूमिके गृहे।। १५

प्रकोष्ठे संस्थितावुभौ स्व पितरौ वन्दी कृतौ।
प्रताडनपर: सुत: उक्तवान् तौहि कथ्यताम्।। १६

कुत्रास्ति गोपितं धनं यदि चेन्नैव दीयते।
गम्यतां यत्र रोचते ब्रूहि स्पष्टं न यातय।। १७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुत्रजाया हि कालिका जगर्ज रौद्ररूपिणी।
श्वश्रूं स्पष्टमुवाच ह कथमायसहृदये।। १८

ब्रूहि स्पष्टं न गोपय कस्मै दास्यसि धनं निजम्।
निज भ्रात्रे ऽ थवा पुत्र्यै (निर्दिश्य) नायंते ऽ स्ति सुतोवद।। १९

साश्रुनेत्रः पिता तदा पुत्रं जलमयाचत।
माताऽपि साश्रु नयना जलं सुतमयाचत।। २०

सुतजाया तदा शीघ्रं जलाय हि बहिर्गता।
सुनियोजित योजना तत्रासीदासुरी ननु।। २१

जलं हि विषमिश्रितं ताभ्यां ददौहि कालिका।
पीत्वा सद्यः दिवंगतौ पुत्रजाया तदा द्रुतम्।। २२

सम्यक् प्रक्षाल्य पात्राणि समागत्य पत्या सह।
उच्चैः रुरोद येन वै परिजनाः समाययुः।। २३

दृष्ट्वा श्रुत्वा च कलिजान् नारदः पर्यतप्यत।
सर्वं ज्ञातं बभूव ह पूर्ववृत्तं पित्रो स्तयोः।। २४

कीर्त्ति निर्माणहेतवे भवनं तेन निर्मितम्।
क्षणशः कणशश्चैव जुहाव कीर्त्ति हेतवे।। २५

ईर्ष्यालवो हि परिजनाः चक्रुस्तस्य सुतं विषम्।
कारणं तद् बभूव ह अकालमरणे तयोः २६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रदूषणं समाजस्य दर्शं दर्शं रुरोद ह।
नारदो व्यथितो जातः स्थातुं शशाक न भुवि।। २७

भारते भारती संस्कृतिः शोभना
नैव वै दृश्यते देव संपूजिता।
आंग्लभाषा प्रचारो हि बोभूयते
तैर्हिलालभ्यतें जीवनं यौवनम्।। २८

नारद-चिन्ता

अहो कष्टं महत्कष्टं भारते जीवनं प्रभो।
हन्येंते पितरौ यत्र निजपुत्रेण स्वगृहे।। २९

पुत्रवधू हिं पूतना नैव नैव हि मानवी।
तेन त्यक्तेन भुंजीया कथ्यते केन श्रूयते।। ३०

गावोऽहि गर्दभास्तथा कृतघ्ना नैव भूतले।
यथा कलौ हि मानवाः संजाताः राक्षसोपमाः।। ३१
कीर्तिर्यस्य सजीवति इति नीतिं समाश्रित्य।
पित्रा विनिर्मितं भव्यं भवनं वंश हेतवे।। ३२
ग्रामीणा नैव कथिता अर्थाभावोऽस्ति साम्प्रतम्।
स्व सुतः सुतजायाऽपि कतरो नैव जानाति।। ३३

किन्तु प्राप्तः पुरस्कारः कुपुत्रेण दुरात्मना।
कक्षे निजेहि तावुभौ निगडितौ बभूवतुः।। ३४

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

याचतुस्तौ यदा जलं तृषार्त्तौ बहु पीड़ितौ।
अलभेतां तदा कटु वचनं वै निजात्मजात्।। ३५

यस्मै धनं निजं सर्वं त्वया खल्वस्ति गोपितम्।
याचतां तं जलं तथा भोजनं मधुरं मधु।। ३६

पितरौ धार्मिकावुभौ कुलमान समर्पितौ।
कणशोधनसंचयं चक्रतुः कीर्त्ति हेतवे।। ३७

कुपुत्रो हि व्यचिन्तयत् कोट्यधीशो हि मे पिता।
परेभ्यो निखिलं धनं दास्यति कीर्तिहेतवे।। ३८

निशम्यवार्तां बहुकष्ट दायिनीम्
बभूव योगी हृदयेन विक्षतः।
पुनः पुनः मूर्च्छति नारदो मुनिः
प्रताड्यते तेन शिरः पुनः पुनः।। ३९
इति चतुर्दशोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथपंचदशोऽ ध्याय:

वायुरूपधरो मुनि: आसीत् पर्यटने रत:।
आसीदुत्तर प्रदेशे जिज्ञासा परिपूरित:।। १

राजकीय कार्यालये दृष्टवान् दृश्यमद्भुतम्।
एकं भालतिलकं हि जनं ददर्श नारद:।। २

सेवा कर्मणि योजित: ब्राह्मणोऽतीव दुर्बल:।
शूद्रो ह्येको प्रभुस्तस्य क्रूर: पिशाचसदृश:।। ३

यदाहीन पदोजन: स्थापयामास पुरत:।
तदाधिकारिणा प्रोक्तम् एवं संस्थाप्यते पात्रम्।। ४

मूर्ख, नाद्यावधि ज्ञातम् कथं चायं हि दीयते।
पुरतो ह्यधिकारिणाम् मूढ, त्वं गर्दभसम:।। ५

कदा ज्ञानं भविष्यति? इत्युक्त्वा कुपितानन:।
गर्हणां भूरिशो ददौ तस्मै विप्राय स प्रभु:।। ६

जानासि नैव रे मूर्ख! चायपात्रार्पणं पुर:।
मनसि चिन्तयाभास सेवको विप्रलांछन:।। ७

अद्याहं प्राप्त जीविक: अनेन सुजनेन वै।
मासिकेन हि वित्तेन परिवारस्य पोषणम्।। ८

सम्यक् संजायते मुदा मदीया पुत्रिका ऽ पिच।
अस्यैव सहयोगेन विवाहिता भविष्यति।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यद्यपि दुःस्मृतिःतस्य विद्युत्पातसमाऽ भवत्।
अनेननैव दुरात्मना गर्भपातो हि कारितः।। १०

दुष्कर्मणि रतो दुष्टः पापात्मा पाप पुरुषः।
कदा विवाहिता जाता जाता मे हि भविष्यति।। ११

विवाह्य तां सुतामहं प्रेषयित्वा पतिगृहम्।
स्वस्थ चित्तो भविष्यामि शूद्र सेवां न जीवने।। १२

करिष्यामि ततः परम् गत्वावृन्दावनं सुखम्।
जीवनं यापयिष्येऽ हम् धर्मपत्न्या सह मुदा।। १३

मदीया हि परिजनाः ये यजमानंजीविनः।
द्रुह्यन्ति मम जीविकां दृष्ट्वा सुखावहां सदां।। १४

किन्तु हाधिक् महत्पापं करोमि निज जीवने।
नियोज्य निजतनयां गृहकार्ये कुकर्मिणः।। १५

वारद्वयं गर्भपातं तस्या हि तेन कारितम्।
प्रचारमेष्यति सर्वं वृत्तं यदस्ति गोपितम्।। १६

सकृच्चर्चा हि यस्यवै समाजे यदि श्रूयते।
तदा तु जातया सह मृत्युर्नो हिं भविष्यति।। १७

एवं चिन्तयतस्तस्य कालोबहु गतो गतः।
गभीरवदनं तस्य दृष्ट्वा शूद्र प्रभुस्तस्य।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रसन्नमनसाब्रूते जाते कार्यं विसर्जिते।
कथं कथं विप्रवर, उदासीनेव दृश्यते।। १९

वचसा मे हि संयात: आहतो व्याहतो भवान्।
मान्यथा गृह्यतां वच: कार्यालयस्य गौरव:।। २०

निहतो न भवेदत: व्यवहार: कृतो रुक्ष:।
पश्य स्पष्टं वदाम्यहं तव कल्याण हेतवे।। २१

न तृतीयो जनो ह्यत्र य: श्रोष्यति वचो मम।
अत: सुस्वस्थ मनसा श्रोतव्यं यद् वदाम्यहम्।। २२

हृदये मे हि वर्तते करुणा ते कृते तथा।
तव भार्या कृतेऽपिच दुहिता ते ममामि सा।। २३

भवान् सर्वं विजानाति वारद्वयं तु सा मया।
मृत्युमुखात् सुगोपिता समाजस्य हि दुर्जना:।। २४

कुप्रचारं हि कुर्वन्ति सत्कर्मद्रष्टुमक्षमा:।
निन्दन्तु नीति निपुणा: प्रलपन्तु खलधिय:।। २५

सदाचारपरायणा: दयावन्तो जना भुवि।
न्यायमार्गान्न जीवने विचलन्ति मनीषिण:।। २६

विवाहोऽपि सुतायास्ते कारयिष्यामि सत्कुले।
धनबलेन सर्वं हि भविष्यति न संशय:।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं विश्वास्य विप्रं तम् अनुगन्तुं समादिशत्।
मनसि चिन्तयामास सौभाग्यं मम हे प्रभो।। २८

रक्ष्यते सेवकस्त्वया मानं सौख्यं च दीयते।
अद्यावधि हि ब्राह्मणैः शूद्रजना हि शोषिताः।। २९

पश्य दशाविपर्ययं शूद्रैः विप्राः विशोषिताः।
सुता त्वस्य हि विप्रस्य जाता भार्योपमा मम।। ३०

जना जानन्ति पूर्णतः किन्तु परवशोजनः।
विश्वसिति मयि विप्रः धनहीनो वशंवदः।। ३१

भारते ब्राह्मणा देवतुल्याः सदा
अग्रपूज्या हि देवैर्मुदा घोषिताः।
आगते वै कलौ तैर्गता शूद्रताम्
कोऽपि नैवास्ति तेभ्यो नतिर्दायकः।। ३२

समाप्तः पंचदशोऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथषोडशोऽ ध्याय:

अथान्ये दिवसे मुनि: विक्षिप्तो मनसाऽभवत्।
चकार निश्चयं तदा नैव स्थास्यामि भारते।। १

दिव्य दृष्ट्या ददर्श ह क्षणेन सर्व भारतम्।
कदाचारो दुराचार: सर्वत्रदृष्टिगोऽ भवत्।। २

आसीदेकोहि वक्ता य: संबोधयति शिक्षकान्।
सर्वकारदलीय: स: स्वसंस्कृति विदूषक:।। ३

आंग्लगिरा हि भाषणे गौरवं मन्यते जन:।
बालको बालिका वा स्यात् भाषात्वाङ्गलोभवेद् भवेत्। ४

आंग्लं हि परिधानं स्यात्-गौरवाय कुलस्य वै।
सर्वकारो ऽ पि यतते संभोगशास्त्र पाठनम्।। ५

विद्यालयेषु मुख्यत: माध्यमिकेषु पाठनम्।
पूतां कल्याणकारिर्णी विद्यां संभोगशास्त्रगाम्।। ६

यदि चेदस्ति संभोग: सहमत्यातदा शुभम्।
विवाह पूर्व संभोगे यदि छात्रा गर्भिणी भवेत्।। ७

तदा विद्यालस्तस्या: गर्भपातं हि कारयेत्।
प्रतिष्ठिते विद्यालये गर्भपाताय कक्षा: स्यु:।। ८

नि:शुल्क गर्भपातनं भवेद् विद्यालये निजे।
ब्रह्मचर्य व्रतचरा: भवेयुर्नैव कोमला:।। ९

बालका: बालिका: का ऽ पि प्रगते भारते ऽ धुना।
भावना दमन पापं न स्यात्प्रगत भारते।। १०

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

औषधं गर्भरोधकं सुलभंसाधनं तथा।
निर्मूल्यं सर्वकारेण दातव्यं प्रगते युगे।। ११

अहो धन्यमहोधन्य-मद्यापिसन्ति भारते।
सत् शिक्षाव्रतिनोजनाः विरोधे ये समागताः।। १२

वात्स्यायनकृतं ग्रन्थं कामसूत्रंसुशोभनम्।
भवेदावश्यकं पाठ्यं माध्यमिक विद्यालये।। १३

मूढधियोहि पश्यन्तु पाश्चात्य संस्कृतिं तथा।
सभ्यतां ते निजाक्षिभिः बालास्तथाहि बालिकाः।। १४

स्वछन्दं विचरन्तिते नैवास्ति तत्र बन्धनम्।
संभोगाद्वर्धते शक्तिः शारीरिकी च मानसी।। १५

सा शक्तिः भारते वर्षे म्लायते च विनश्यति।
श्रुत्वैतन्मधुभाषणं नेतृणा नव् भारते।। १६

खिन्नो जातो हि नारदः स पूर्वाभिमुखो ऽ भवत्।
पुनः काशीमुखो ऽ भवत् श्रोतुं वै देवभारतीम्।। १७

आकाशे श्रुतिर्गोऽ भवत् नमाजस्य प्रतिध्वनिः।
ध्वनि विस्तारकेण या विस्तारिता भवतिस्म।। १८
क्षणं विचलितो जातः धैर्यं तत्याज नैव सः।
देवभाषा विद्यालयान् द्रष्टुमितस्ततो गतः।। १९

आंग्ल विद्यालयास्तथा छात्रास्चाप्यांग्लवेशगाः।
संख्या संस्कृतभाषायाः विद्यालयस्य दुर्बला।। २०

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न वक्ता न श्रोता न विद्यालयो वै
कलौ याति दृष्टिंगत: काशिकायाम्।
श्रुता देवभाषा मुदायत्र भूयात्
सुवक्ता ऽपि दृष्टिंगत: स्यात् प्रसन्न:।। २१

न वेदध्वनिर्नैव शंखध्वनिर्वा
नमाजध्वनि: केवलं याति कर्णे।
दरीदृश्यते काशिकायां विषण्ण:
विपन्नो हि विप्रो वृताकाशवृति:।। २२

न साकाशिका यत्र शंभोर्निवास:
सदा यत्र वेदध्वनि: श्रूयमाणा।
इदानीं मुदा देशजाता त्यजन्ति
स्वधर्मं स्वभाषां स्ववेशं स्वलज्जाम्।। २३

सदा कामिनी कश्चनासक्त चेता
मुदा देशमार्यं परित्यज्य गन्तुम्।
विदेशं हि वक्तुं विदेशीय भाषाम्
जनाभारतीया हि दृष्टा दिवान्धा:।। २४

विदेशायभक्ति: विदेशानुरक्ति:
यथा दृश्यते भारते भोगभक्ति:
तथा नैव नेत्रेण वै दृश्यमाना
त्वया वै तु शक्या त्रिलोकेऽपि भ्रात: २५
समाप्त: षोडशोऽ ध्याय:

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथसप्तदशोऽ ध्याय:

सुखं यामिनी याति तस्यैव लोके
न यस्यास्ति चिन्ता धनार्थं सुतार्थम्।
स्वदेशाय संकल्पितं येन सर्वम्
धनं जीवनं यौवनं कामिर्नी वा।। १

स्वदेशाय देहं स्वदेशाय गेहम्
स्वदेशाय सर्वं जुहोतुं स्वकीयम्।
भवेत्प्रस्तुतो भारतीय: प्रवीर:
तदा भारतीयो जनोवन्दित: स्यात्।। २

सदा सन्तु देशाय सर्वं जुहोतुम्
सुखं प्रस्तुता भारतीया युवान:।
अहो भारतीया: सदा रामभक्ता:
सदा जाग्रता: संधबद्धा भवेयु:।। ३

त्वदीया हि शक्ति: त्वदीया सुभक्ति:
भवेद् गौरवार्थं स्व देशस्य लोके।
भवेद् वन्दितं भारतं भा-रतं ते
भुवौ भातु दिव्या विभा ते प्रवीरा:।। ४

प्रदेशे चोत्तरे स्थित: ग्रामोह्येक: सुचर्चित:।
बलियामण्डले ख्याते गंगाया: पावने तटे।। ५

नारदो हि परिभ्रमन् जिज्ञासापरिपूरित:।
जगाम तत्र संद्रष्टुम् चयने कास्थितिर्मीति:।। ६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आसीत्तदाति चर्चा हि को वा दलो विजेष्यति।
बाहुबली हि कुख्यातः प्रत्याशीतत्र घोषितः।। ७

कर्णाकर्णी गता वार्त्ता नारदं योग विग्रहम्।
प्रत्याशिनं तमेवहि द्रष्टुं जगाम स मुनिः।। ८

नारदस्य हि सौभाग्यं कार्यालये तदाहि सः।
आसीत् स्व बाहुबलिभिः परिवृतोहि संस्थितः।। ९

एकं बाहुबलीं दृष्ट्वा सिंह नादेन सोऽ ब्रवीत्।
श्रूयतामति सुस्पष्टं यन्मया कथ्यतेऽधुना।। १०

मदीयं वचनं सदा सत्यं भवति भूतले।
सन्तिं मम रणक्षेत्रे (चुनावक्षेत्र) ग्रामास्तान् पंचमण्डले।। ११

विभज्य कुरु शासनं प्रबन्धं यद्धि रोचते।
अर्थापेक्षा भविष्यति तदर्थं नैव चिन्तनम्।। १२

भवद्भिः खलु कर्तव्यं तदर्थं तु सखा तव।
सुप्रयासं करिष्यति वर्तते दूरभाषणम्।। १३

ग्रामे-ग्रामे गृहे-गृहे सम्यक् संख्यां तु ज्ञायताम्।
चलभाषमपेक्षितं स्वजनेभ्योहि दीयताम्।। १४

प्रत्येक धनवान् जनः एकान्ते स्मारयन्तु भो।
मदीयं भीषणं कर्म रोमांचाय हि तद् भवेत्।। १५

थानाध्यक्षा हि सूचिता स्थानीया सर्व एव हि।
स्थास्यन्ति राजपुरुषा दर्शकिव रणाङ्गणे।। १६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्ट्वा श्रुत्वा कुकर्म वै भारते राजनेतृणाम्।
मथितो व्यथितो जात: नारदो मुनि सत्तम:।। १७

अन्यत् क्षेत्रं जगाम स: जिज्ञासु: नारदो मुनि:।
अत्रासीदन्त्यजो नेता सुगुप्त मंत्रणारत:।। १८

आसीदतीव विश्वस्त: अन्त्यजानां मताय स:।
नासीच्चिन्ता मनसिहि अवादीदत एव हि।। १९

उच्चवर्गीय वान्धवान् कुर्वन्तु मृदु वचसा।
प्रणत्या च मुहुर्मुहु: प्रकुर्वन्तु स्वं पक्षगान्।। २०

अद्यावधि हि शासिता: शासका वै भविष्यन्ति।
संख्या गरीयसी हि न: अत एव प्रशासनम्।। २१

अस्माकमेव भविता भारते वै न संशय:।
हिन्तुस्ताने न हिन्दुभ्यो महत्वं दीयते तथा।। २२

यथा वै दीयते जनै: मुस्लिमेभ्यो न संशय:।
किन्तु तेषां मतं नूनं विकीर्णं नैव भारते।। २३

एकीभूतं मतं तेषां विजयाय हि भूयते।
अत एवहि पूज्यन्ते भारते ते न संशय:।। २४

मतदानस्य निश्चित: कालो यदा समागत:।
विचचार तदा योगी ग्रामे-ग्रामे गृहे-गृहे।। २५

प्रवाहो जातिवादस्य दलितेषु विशेषत:।
आसीदतीव भीषण: अन्त्यजेषु विशेषत:।। २६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आसीद् यादव प्रत्याशी भीषणोऽ ति विभीषण:।
ग्रामे-ग्रामे सुनियुक्ता: आसन्तस्य सुसैनिका:।। २७

आसन् जनाहिंचिह्निता: सर्वे वै परपक्षगा:।
ते सर्वे कथिता जाता मतदानं न कर्त्तव्यम्।। २८

भवद्भि: श्रूयतां सखे निर्देशो ऽ स्ति समागत:
सेवका छद्मवेषेण विचरन्ति हि सर्वत:।। २९

बाहुबलेर्हि निर्देश: पालनीयोमुदा सदा।
अन्य: विपक्षगोजन: अर्थबलेन साधित:।। ३०

प्रत्याशी य: सदाचार: जातो गृहेह्युपेक्षित:
दृष्ट्वेदं गर्हितं दृश्यं रुरोद नारदो मुनि:।। ३१
आसीदेकोऽ तिधनवान् तस्मिन् क्षेत्रे विपक्षग:।
आदिष्टो लक्षरुप्यकं प्रदातुं बाहुबलिने।। ३२

अन्यथा तस्य पुत्रस्य, प्राणरक्षा न संभवा।
गुप्ता वार्ता हि गुप्ता स्यात् यदि कल्याण कामना।। ३३

आरक्षिणो हि पूर्वत: ज्ञाताश्च वशवर्तिन:।
थानाध्यक्षो हि पूर्वत: आसीत्कृत: स्ववशग:। ३४

अपरं दृश्यम्

किन्तु किमिह दृश्यते भैरवं कर्म दारुणम्।
दर्शने पातकं नूनं किन्तु परवशोजन:।। ३५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देशभक्तिमधः कृत्य हृदि कृत्य निजं सुखम्।
विलज्जाः जनसेवकाः लुण्ठन्ति निजभारतम्।। ३६

प्रशासने तु ये सन्तिं ते तु सन्ति सुरक्षिताः।
पश्य पश्य इमे जना धनपर्वत संस्थिताः।। ३७

किन्तु दाक्ष्यं कियत्प्रभो नद्दश्यते हि पर्वतः।
पर्वतो हि धनस्यैष विदेशेषु सुगोपितः।। ३८

न केवलं स्विस बैंके यत्रास्ति गोपनीयता।
किन्तु यदा भविष्यति शासने परिवर्तनम्।। ३९

तदातुबहवो जनाः कारागारे भविष्यन्ति।
हा धिक् किं दृश्यते देशे दर्शं दर्शं तु रोदनम्।। ४०

जायते भीषणा व्यथा पश्यानाथां हि विधवाम्।
शिशुं नैजं हि दुर्भगं प्रक्षिप्तोच्छिष्टभोजनम्।। ४१

समादाय ददाति यत् तदेव रवादति सुतः।
माता ऽ पिच वुभुक्षिता किन्तु मोहः सुतस्य वै।। ४२

निजं दुःखमनादृत्य खादयति निजं सुतम्।
हा धिक् किन्तु पार्श्वस्थः श्वान एको भयंकरः।। ४३

मातुः हस्ताद्धि पूपिकां नीत्वा मुखे पलायितः।
चीत्कारेण रुरोदह बालको ऽ ति बुभुक्षितः।। ४४

चक्षुर्भ्यामश्रु विन्दवः पेतुर्मातुस्तदाभृशम्।
क्षुत्पिपासार्दिता माता शोढुं शशाक नैवहि।। ४५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दु:खं स्वतनयस्य पपाताधोमुखी मृता।
शिशु: रोरुद्यमानोऽ यं मूर्च्छितश्च दिवं गत:।। ४६

दृष्ट्वा बुभुक्षामरणं तु नारद:
हाहेति हाहेति तदा चकार स:।
नारायण: पङ्कज लोचन: प्रभु:
कुत्रास्ति शेते धरणीधरो विभु:।। ४७

पापस्य भारेण यदाहि मेदिनी
कम्पायिता वा व्यथितेव दृश्यते।
त्यक्त्वा हि वैकुण्ठ निवासमात्मन:
द्रुतं समायाति हि भारते हरि:।। ४८

क्षणमास्थाय तत्रैव नारदो हि व्यचिन्तयत्।
व्यतीतं जीवनं तयो: मातु: सुतस्य करुणम्। ४९

तदा क्षणेन निखिलं जातं वृत्तं सुविवृत्तम्।
नासीन्माता हि या मृता साऽऽसीत् पितामहीध्रुवम्।। ५०

तस्या पतिर्हि पण्डित: पूजावृत्ति सुजीवन:।
आवासाय गृहपति: शुल्कमुक्तिं ददौ मुदा।। ५१

किन्तु दिवंगतो विप्र: वर्षद्वयं यदा गतम्।
श्राद्ध कर्मणि दत्तवान् सहयोगं गृहपति:।। ५२

शिशो: माता कलावती त्यक्त्वा सुतं त्रिमासिकम्।
यमसदनं जगाम ह शिशुं पितामही तदा।। ५३

पालयतिस्म यत्नत: साधनाहीनवत्सला।
दर्शं दर्शं तु दुर्दशां दारिद्र्यं विप्रवंशस्य।। ५४

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गृहान्निसारयामास दरिद्रारुपिणीं हि ताम्।
ततः प्रभृति सा वृद्धा दुर्बलाशिशुजीवना।। ५५

ग्रामांचलं जगाम ह प्रतिष्ठा रक्षणाय सा।
जीवनं भिक्षुक वृत्या यापयतिस्म दुर्भगा।। ५६

ददाति भोजनं जलम् आदौतस्मै हि शिशवे।
पश्चात् स्वयं हि गृह्णाति भवेदवशिष्टं हि यत्।। ५७

अद्यासीत् विप्रभोजनं निशायां यत्र सा गता।
द्वाराद् बहिः स्वपौत्रेण साकं स्थिता सुरक्षिता।। ५८

द्वाराद् बहिः यदा कोऽपि यातिदृष्टिंगतो जनः।
तदा समुत्सुका वृद्धा पश्यति तं मुहुर्मुहुः।। ५९

उच्छिष्ट भोजन पत्रं समादाय हि प्राक्षिपत्।
एकोहिगृह सेवकः ददर्श सा तथाविधम्।। ६०

धावन्ती तत्र सा गता लब्धुमुच्छिष्ट भोजनम्।
सा हि यत्नेन पिष्टिका खण्ड द्वयमवाप ह।। ६१

भोजयितुं यदा शिशुं चेष्टां चकार सा तदा।।
पुष्टःश्वा हि समागत्य खण्ड द्वयं जहारतत्।। ६२

आदौ मृता पितामही पश्चात् गतो हि सः शिशुः।
क्षुत्पिपासार्दितावुभौ यमलोकायप्रस्थितौ।। ६३

इति सप्तदशोऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ अष्टादशो ऽ ध्याय:

नारदवैचित्यम्

श्रूयते ऽ त्र भैरवं गर्जनं स्वभारते
पलायतां, पलायतां, नारद, पलायताम्।
नायकाश्च नायिका: घोषयन्ति ते मुदा
एकलिंगभोगजं सुखं न बाधितं भवेत्।। १

भारतीय बालक: प्राप्तयौवनो युवा
भारतीय बालिका नायिका सुयौवना।
भवन्तु नैव वञ्चिता: समानलिंगभोगत:
समानलिंग भोगजात् सुखान्न सन्तु वञ्चिता:।। २

श्रुत्वेदं घोरगर्जनं नारदोऽ भूद् विकम्पित:।
विक्षिप्तेव हि भूतलात् पलायनपरो ऽ भवत्।। ३

राममन्दिर निर्माणे सुसह्योगकरणम्।
बभूवभूरि कष्टदं पुनर्नैव करोतु भो।। ४

पलायतां पलायतां कुभारतात्पलायताम्।
भीतो विक्षिप्त चेताऽयं दिवं जिगमिषुरभूत्।। ५

किन्तु ददर्श भूतले दृश्यमतिभयानकम्।
बालकाश्च युवानश्च आसन् प्रदर्शने रता:।। ६

भीषणं घोर गर्जनं ध्वनिविस्तारकेण च।
कुर्वन्तिस्म प्रदर्शनं विरोधे सर्वकारस्य।। ७

न्यायाधीश समादेश: आसीत्तेन समर्थित:।
सर्वकारेणदेशस्य तदासीत् क्षोभकारणम्।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्ट्वा किन्तु जनाक्रोशं प्रशासनं विकम्पितम्।
समलिंगी सुसंभोग-समर्थने समागतम्।। ९

नरा:यान्तु यमालयं नार्यश्च विहता: क्षता:।
पश्य प्रशासनं हस्ताद् विच्युतं न भवेद् भुवि।। १०

इति नीर्तिं समाश्रित्य प्रशासनं हिं भारते।
जातं वै मूक दर्शकं अतो वै जनसागर:।। ११

उत्तालोत्ताल वीचिभि: प्रकम्पितो बभूव ह।
जनसामान्य हेतवे रुचिकरोहितकर:।। १२

बभूव श्रुतिगोचर: नारदाय तदा द्रुतम्।
जिज्ञासा पूरितो मुनि: शुश्राव शान्त चेतसा।। १३

जनानां कोपकारणं किन्तु तदैव दृष्टवान्।
नारीणां बालिकानाम् च रौद्र रूपं हि वीथिषु।। १४

नपुंसकै: समर्थितम् आन्दोलनं भयावहम्।
किन्तु जातं क्षणेन वै सुस्पष्टं कारणं तयो:।। १५

आन्दोलनं भयावहं स्वाधिकाराय भारते।
प्रकुर्वन्ति नरा-नार्य: नपुंसकै: समर्थितम्।। १६

समलिङ्गी सुसंभोग: बाधितो यो बभूव ह।
तदेवास्तीह कारणं विक्षोभस्यहि भारते।। १७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनसि चिन्तयाभास नारदो मुनिपुंगवः।
यदि चेद् भारते पुनः गृह्यते पार्थिवं वपुः।। १८

दुर्योगेन युवा कोऽपि भाम् निपात्य...........।
नैव नैव कदापि न क्षणार्धं तिष्ठ नारद।। १९

जातोऽयं नरको देशः वायुश्चात्र प्रदूषितः।
सर्वं जातं प्रदूषितं भारतं नरकायते।। २०

ये बाहुबलिनः सन्ति वसन्तु तेहि भारते।
दुर्बल पुरुषेभ्यस्तु जातो देशो भयावहः।। २१

लाभार्थं हि जनमतं नेतारो भारते भुवि।
वैधानिकं करिष्यन्ति समलैंगिक संभोगम्।। २२

का गतिर्हि भविष्यति सज्जनानां हि भारते।
नूनम् शीघ्रं कल्कि नाम्ना प्रभुः समागभिष्यति।। २३

गुदा मार्गेण संभोगं कारयन्ति नपुंसकाः।
पूर्व जन्मकृतपापात् दण्डिताः सन्ति जीवने।। २४

रौरवं नैव नूनं तथा कष्टदम्
भारतं वै यथा भूतले दृश्यते।
पापिभिः मानवैः भारतं दूषितम्
नैव गच्छन्तु देवाः पुनः भारतम्।। २५

इति अष्टादशोऽ ध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एकोनविंशोऽध्याय:

संस्कृत कवि-सम्मेलनम्

सभासञ्चालक:

सम्मेलने समागता: कवयो ये यशोधरा:।
धन्यवादाहि सर्वेभ्य: दीयन्तेऽत्रधियाहृदा।। १

नूनमद्यहि सौभाग्यं बंगलोरस्य वर्त्तते।
कवयो दिव्य दर्शना देश-देशान्तरागता:।। २

धन्यवादा हि भूरिश: संस्थया नो हि दीयन्ते।
आदौ त्वाहूयते मया ख्यातोऽयं कविकर्दम:।। ३
श्रावयतु कृपया स: काव्यामृतं सुदुर्लभम्।

कवि कर्दम:

इयं कामिनी कज्जलाक्षी सुनेत्रा
नितम्ब प्रकम्पेन चित्तं हरन्ती।
यदा याति मार्गे हसन्तीव भाति
मुदा दर्शकान्पा ययन्तीव प्रीतिम्।। ४

नैव धर्मो विधर्मो ह्यधर्मो नृलोके
वैभवं काञ्चनं कामिनी कामशक्ति:।
भूयसी लभ्यते वै यया सो हि धर्म:।। ५

स्वतंत्रे ऽपि जाते स्वदेशे सखे
क्षतिर्नैव कापीह देहश्यते।
स्ववेशोऽपि वैदेशिको वर्त्तते
सुशिक्षाऽपि वैदेशिकी दृश्यते।। ६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जीवने यावती वर्त्तते भोगशक्तिः
तावती वै समर्प्या हि संभोग कार्ये।
नैव कार्यो विलम्बः स्वकीया विचारे
नायिका पारकीया न कापीह भूमौ।। ७

धर्म चर्चा न कार्या कदापीह लोके
मुदा स्यात्समर्प्या हि संभोग यज्ञे।
कलौ केवलं नायिका भोग यज्ञं
पुनीतं मुदा कथ्यते विज्ञवीरैः।। ८

सर्वा नार्यः प्रसादेव ग्राह्या विज्ञैर्हिमानवैः।
प्रत्यहं पंचभुक्ता स्यात् देवर्षि पितृप्रीतये।। ९

स्वकीया परकीयायाः भेदो नैव हि नैवहि।
भोजनं भोजनं भवेत् स्वपरभेदो न साम्प्रतम्।। १०

यदाऽऽयाति सा कामिनी कज्जलाक्षी
तदाऽऽयाति सर्वं सुखं देवलोकात्।
निराशा-निशा याति दूरं विदेशम्
यदा सा हि शेते निजाङ्के शुभाङ्के।। ११

जीवनं यौवनं तावदेवास्ति नूनम्
प्रिया कामिनी वर्तते बाहुपाशे।
यया दीयते सर्व सौख्यं हि मह्यम्
अनायाचितं देवलोकस्य सौख्यम्।। १२

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुखं जीवनं याति मार्गेण येन
मुदा तेन मार्गेण गच्छन्तु वीरा
अयं मे हि तातस्तथामातृकेयम्
विचारेण दुःखं न भूयात्स्वदेशे।। १३

सभासञ्चालकः

सहस्रशो हि कवयः वर्त्तन्ते ऽत्र समागताः।
सर्वेभ्योऽस्ति निवेदनं करबद्धं हि श्रूयताम्।। १४

श्लोकेनैकेन वा द्वाभ्यां ते कुर्वन्तु समापनम्।
स्थाली पुलाक न्यायेन विज्ञातास्ते भविष्यन्ति।। १५

निवेद्यतेऽति कष्टेन भवतां सेवकेन वै।
कविताऽमृत घटानाम् पानात्तृप्तिर्नसंभवा।। १६

कविगर्दभः

अस्मिन्नतीव विख्याते कवि सम्मेलने त्वहम्।
भवद्भ्यः श्रावयिष्यामि श्लोकमेकं सुखावहम्।। १७

इयं सुस्तनी सुस्मया चारु नेत्रा
नितम्बस्य कम्पेन कम्पायते नः।
शरीरं न वै केवलं सर्वलोकम्
मुदा तां हि पश्यन्ति देवा दिविस्थाः।। १८
श्रोतारः समुपस्थिताः चक्रुः करतलध्वनिम्।

सन्तुष्टोहि कविस्तदा निजासनं जगाम ह।। १९
कविकुक्कुरः

जीवने यौवने सर्वकाले सखे

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैभवे यावती वर्त्तते भैरवी।
सौख्यदा कीर्तिदा त्राणदा त्वौषधी:
तावती नैव दृष्टात्रिलोकेमया।। २०

भारते चेल्लभेन्मंत्रिपूतं पदम्
वैभवं स्वागतार्थं सदा प्रस्तुतम्।
वायुयानेन यात्रा विदेशेषु स्यात्
स्वागतंमें विदेशेऽ पि बोभूयते।। २१

तुमुलकरतल ध्वनि:

कविकल्मष:

स्वासनाद्धि समुत्थाय यदा वक्तुमियेष स:।
तदा करतलध्वनि-नाद सम्मानितोऽ भवत्।। २२

करबद्ध: स्थित: कवि: भृशं प्रीत: स्मयानन:।
श्रोतॄन् प्रणम्य कृतवान् शिष्टाचार प्रदर्शनम्।। २३

कवितापाठ:

श्रूयतां श्रूयतां हे प्रियो बान्धव:
सौख्यमूलंधनं कथ्यते सज्जनै:।
वैभवं किन्तु कैर्जीवने लभ्यते
नैवतल्लभ्यते ज्ञानिभिर्मानवै:।। २४
वैभवं भारते वै कथं लभ्यते
श्रूयतां मुक्त श्रोत्रं हि यद्ब्रूयते।
बाहुवीरोयदादृश्यते् कालवत्
वैभवं वर्षते ते गृहे नित्यश:।। २५

तेचक्रु: स्वागतं तदा श्रोतार: समुपस्थिता:।
करतलध्वनिनादै: सत्कवेर्मानवर्धनम्।। २६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रूयतां श्रूयतां गर्जनं नैवभो
(क्षणं विरतिः)
कालिकाहि भैरवी पूज्यते स्वभारते
दीयतां तथैवभो शिक्षणं प्रशिक्षणम्।
मार्दवेन नैव ते पूजनं प्रशासनम्
संभवोऽस्ति भारते भैरवं हि स्याद्वपुः।। २७

शासको हि भैरवो शासनं भविष्यति
ते सदैव भारते ते सदैव भारते।
(करतलध्वनिः)
रूण्डमुण्ड धारणे सुक्षमाभवन्तुते
बालकाश्चबालिकाः भैरवा हि कालिकाः।
यान्तुते यमालयं येहि ते विपक्षिणः
यर्थरायताद् वपुः ये हि ते विरोधिनः।। २८

कर्णगो यदाभवेत् भैरवं स्व गर्जनम्
राक्षसोऽपि ते भयात् कम्पितो विकम्पितः।
चण्डदण्ड भीतितः भूतले हि साध्यते
सर्वकार्यमञ्जसा गर्जनं भवेद् भवेत्।। २९

ते चक्रुः स्वागतं तदा श्रोतारः समुपस्थिताः।
करतलध्वनिनादैः सत्कवेर्मानवर्धनम्।। ३०
ततः उत्तिष्ठति
गण्डकविः
श्रोतारः समुपस्थिताः चक्रुः करतलध्वनिम्।
बभूव मानवर्धनं कलिरूपस्य सत्कवेः।। ३१

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सभासंचालक:

गण्डमूर्खो महाकवि: सैभाग्येन समागत:
कविर्नूनं नवीनां स्व रचनांश्रावयिष्यति।। ३२

करतलध्वनि:

सत्यं-सत्यं ब्रवीतिभो सभासंचालकोभवान्।
नूनं ज्वलंत विषये रचनामम वर्त्तते।। ३३

समलैंगिक संभोगो विषयोबहु चर्चित:।
ममापि वर्त्तते रुचि: विषयेऽस्मिन् न गोपितम्।। ३४

श्रूयतां श्रूयतां सज्जना वैमुदा
नास्ति भीतिर्हिगर्भस्य वै यौवने।
नैवराजस्वलीयावकाशोऽधुना
निर्भयं भुज्यतां मोदतां जीवने।। ३५

श्रूयतां श्रूयतां नायका नायिका:
मानवो भूतले वर्त्तते देवता।
नास्ति कोऽपीह वै ज्ञानवान्प्राणिषु
मानव: कथ्यते देवतुल्योजन:।। ३६

लभ्यते सामलिङ्गेन भोगेन यत्।
देवलोकेऽपि सौख्यंत्विदं दुर्लभम्
सामलिङ्गं सुखं वै मुदा भुज्यताम्।। ३७

पशव: पक्षिण स्तथा जलचराश्चखेचरा:।
सर्वे सन्तीह वञ्चिता: सुखादस्मात्सु दुर्लभात्।। ३८

करतलध्वनि स्तदा तुमुलावै कृताजनै:।
कम्पायितं नभोजातं देवाश्चापि विकम्पिता:।। ३९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किन्तु किन्तु

वायुरूपधरोमुनिः नारदोऽपि कुयोगतः।
आसीत् तत्रैवसंस्थितः कवि सम्मेलने कलौ।। ४०
ददर्श श्रोतृ वृन्देषु समुत्साहमलौकिकम्।
समलिङ्गीय संभोग-समर्थनं बहुमतैः।। ४१

तदातिभीत भीतोऽयं पलायनपरोऽभवत्।
मनसि चिन्तयामास मूढोऽहमति दुर्मतिः।। ४२

पलायतां पलायतां भारतात्-पलायताम्
यातु नैव दुर्गतिं भारतात् पलायताम्।। ४३

दानवाश्चपिशाचाश्च न तथा सन्ति भूतले।
क्रूराः खलाश्च कामुकाः यथा सन्ति नराभुवि।। ४४
इति एकोनविंशोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ विंशतितमोऽध्यायः

कलौ नारी कलौनारी कलौनारीभयावहा।
यदि चेदर्ध शिक्षिता तदा तुकालिका समा।। १

पश्यन्तु भुवि मानवाः नारीमिमां सुदारुणाम्।
कलौ समागते देशे पापाचारस्य नर्त्तनम्।। २

भारतीया हि संस्कृतिः भारतीय परम्परा।
गता कुत्र रसातले किंवा गता यमालये।। ३

पश्येमां हि सुतजायां कालिकां हिभयावहाम्।
निजां श्वश्रूं न केवलं धर्षयति कुलाङ्गना।। ४

श्वसुरश्चापि कर्कशा वाग्वाणैर्विमर्दयति।
पुत्रवधूर्हि प्रेतनी रौद्र रूपा भयावहा।। ५

असीतिवर्ष देशीयौ रूग्णौ तथाति दुर्बलौ।
ब्रूते सा प्रेतनी हि तौ पितरावति दुर्बलौ। ६

पुत्रवधूरुवाच

अशीतिवर्षदेशीयौ बृद्धायेते युवामहो।
अशक्तौ गृहकर्मणि सुशक्तौ भोजने युवाम्।। ७

श्रूयेतां यद्ब्रवीम्यहं नवतिवर्ष पारगाः।
बह्वयो नार्यो हि नगरे गृहकर्माणि कुर्वन्ति।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भोजनपाचनं तथा पात्रप्रक्षालनादिकम्।
सर्वं कर्माणि कुर्वन्ति स्वयमेव ददति न।। ९

कष्टं पुत्रवधूं निजां कोमलाङ्गीं सुशिक्षिताम्।
सम्यग् ज्ञातमिदं सर्वं भवद्भिर्नैव गोपितम्।। १०

श्रूयतां श्रूयतां सर्वं सावधानं हि श्रूयताम्।
आंग्ल विद्यालये मया क्रियतेऽध्यापनं शुभम्।। ११

द्रव्यं यशो हिलभ्येते यदस्ति कीर्तिवर्धनम्।
मया भवेद् गृहकार्यं स्वप्नेऽपि नैव संभवः।। १२

सुखाय युवयोर्मया नियुक्तोऽस्ति सुसेवकः।
पात्र प्रक्षालनं तथा गृहसम्मार्जनं सर्वम्।। १३

क्रियते कर्म कष्टदं भवतः सुख हेतवे।
भवत्कृते तु पाचनं चायपात्रादिक्षालनम्।। १४

सुखदं मोददं कर्म स्वास्थ्य संवर्धकं कृतम्।
श्रमदं कर्मकर्त्तव्यं भवद्भ्यां सुखहेतवे।। १५

पुनश्च

ज्ञानं पदं सुतस्य ते दृष्ट्वा जाता विवाहिता।
प्रभूतं चधनं दत्तं विवाहे जनकेन मे।। १६

भृत्या नाहं न भविता स्पष्टं स्पष्टं हिकथ्यते।
कुरुतां पुत्रिकोपमां सुतजायां वदाम्यहम्।। १७

यदि चेन्नैव रोचते तदा न्यायालयं चल।
सुतजायाप्रताडनात् पीडितौ तौ बभूवतुः।। १८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रावं श्रावं हिधर्षणं श्वश्रूर्जाता विकम्पिता।
ग्राम्या तथाऽति सरला मूर्छिता पतिताभुवौ।। १९

क्षणेनाल्पेन सादेवी दिवंजगाम तत्क्षणम्।
तातो ऽपि हत चेतनः शशाक नैव जीवितुम्।। २०

मुखात्समागताधारा रुधिरस्य पपात सः।
कालिकायाः पुरस्तात्स पत्नीमनुजगामह।। २१

दृष्ट्वेदं गर्हितं दृश्यं नारदोऽपि रुरोद ह।
किन्तु जातो नदृष्टिगः वायुरूपधरान्मुनेः।। २२

द्रव्य लोभाज्जनाः राक्षसत्वंगताः
नैव तेष्वस्ति दाक्षिण्यभावोऽधुना।
भारते द्रव्यलोभो यथा दृश्यते
नैतिकं मूल्यनाशं तथैवाक्षिगम्।। २३

यथा राजा तथा प्रजा कथ्यते श्रूयते जनैः।
सत्यं वै सार्वकालिकं तथा च सार्वभौमिकम्।। २४

मंत्रिणश्च प्रशासकाः अर्थप्राणाहिभारते।
रामराज्यस्य कल्पना साकारा चेद् भवेद्भुवि।। २५

तदा नैवाक्षिगोभवेदेतत्कुकर्मभारते।
विश्वगुरोर्हि पदवीं लभेत भारतं पुनः २६
तदा तु सर्वकष्टेभ्यः मुक्तिः स्याद्भारते पुनः।
प्रजा कल्याणकामना या ऽऽ सीद् रामस्य मानसे।। २७

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तया हि प्रेरितः रामः वनवासं ददौ निजाम्।
सीतामर्धांगिर्नी प्रियां विज्ञातां पूतचरिताम्।। २८

लोक कल्याणहेतवे त्यक्तवान् सत्प्रशासकः।
भवन्तु त्याग तत्पराः नैव स्वार्थ परायणाः।। २९

आपेति नाभिका संस्था दृश्यते ऽ द्य समागता।
अनेन सूच्यते स्पष्टम् सामान्यमानवाहि ये।। ३०

तेतुसन्ति सदाचाराः निम्नोच्चौनैव सज्जनौ।
कालेनाल्पेन विवृतं सत्यं नूनं भविष्यति।। ३१

(किन्तु) धन लोभोहिदारुणः पदलोभोऽति दारुणः।
मुण्डे-मुण्डे मतिर्भिन्ना सर्वे जानन्ति मानवाः।। ३२

बहुजनाः शुचिमनाः भविष्यन्ति स्वभारते।
विचारोऽति पुनीतोऽस्ति किन्तु नैवास्ति संभवः।। ३३

यद्यदाचरतिश्रेष्ठः तत्तदेवेतरोजनः
कथनं सार्वकालिकं सत्यं वै कथ्यते बुधैः।
'आमजंनाः' कथंकलौ वितथंतत्करिष्यन्ति।। ३४

न मे स्तेनोऽस्ति जनपदे न कदर्यो न मद्यपः।
वक्तुमेतत्समर्थः किं वर्त्तते कलिमानवः।। ३५

हत्या तथा बलात्कारः उत्कोचलुण्ठनादिकम्।
सर्वं यास्यति मंत्रेण यातु द्रक्ष्यन्ति मानवाः।। ३६
इति विशंतितमोऽध्यायः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कविनिवेदनम्

आसीत्याप प्रदर्शनं लक्ष्यं मे श्रृणुभो सखे।
पापाः सर्वे प्रदर्शिताः भवन्तु मार्गदर्शकाः।। १

बहवो राजनायकाः भारते सन्ति दुर्भगाः
धनलुण्ठन कर्मणि सुलग्नाः स्वार्थसाधने।। २

पुनश्च

भारतीयं धनं याति विदेशेषु सुगोपितम्।
भवन्ति पुष्टपुष्टास्ते भारतीय धनेन नः। ३

भारतीया हि निर्धना भवन्ति चेद्भवन्तु ते।
नेतृणां स्वार्थसाधने बाधा नैवभवेदिह।। ४

आंग्ल विद्यालया देशे वर्धन्ते यदि का क्षतिः।
संस्कृतं तु मृताभाषा केवलं देव पूजनम्।। ५

क्रियते भाषयाऽनया लभ्यते मोदकं धनम्।
यजमान प्रवंचकैः पण्डित नाम धारिभिः।। ६

अनेनैव विवर्धते पापाचारो हि भारते।
एवं विधाविचारणा न भवेद् भारते पुनः।। ७

सत्पथे स्थापितुं पुनः भारतीयान् स्वबान्धवान्।
द्रष्टुं तान् सुखिनोदेशे विदेशेष्वपि मे मनः।। ८

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुभकामना

कदाचारसिन्धौ निमग्ना हि सर्वे
जनाभारतीया हि ये देव-भूमौ।
न वै साधव: साधुभावा हि देशे
कदाचारपंके हि सर्वे निमग्ना:।। १

सुखं शर्वरी यात्यनाथालयेषु
जनानां निजै: ताडितानां स्वगेहे।
पदे राजकीये स्थिता ये हि सन्ति
उभाम्यां कराम्यां सुलुण्ठन्ति द्रव्यम्।। २

सुताया: निजे मातृगर्भे ऽपि हत्या
विवाहे न दत्तं धनं याचितं चेत्।
तदास्वीकरोतीव मृत्युं सुताया:
न तस्याधिकारो ऽस्ति स्थातुं क्षणार्धम्।। ३

कलौ सर्वकार्यं धनेनैव साध्यम्
सदाचार युक्तो नरो दण्डित: स्यात्।
कदाचार सिन्धौ सुमग्नो ऽ पिधौत:
दरीदृश्यते काञ्चनस्यैव शक्ति:।। ४

न चैकाकिनी स्याद् गृहे बालिका ते
न वा ते सुभार्या कदापीह गेहे।
धनं जीवनेनैव सार्धं जुहोतुम्
न वातेऽस्ति वाञ्छा तदा नैव कुर्या:।। ५

यदादेवभाषा-ध्वनि: पावनी वै
भवेच्छ्रूयमाणा गृहेप्रान्तरे वा।
भवेद् भारतस्याम्बरे श्रूयमाणा
तदैवास्तिमुक्ति: कदाचारजातात्।। ६

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुशिक्षा सदाचार माता हि भूमौ
सदा श्रूयते भारते देवभूमौ।
गिरादेवलोकस्य देशस्य दुःखम्
विदाह्यैव शम् भारते भो तनोतु।। ७

कलौ नैव दृष्टा स्वधर्मात्सुभीतिः
न चापीश्वराच्चैव प्रेतात्कुभीतिः
कलौ केवलं केवलं द्रव्यभीतिः
न वा सर्वकारान्न लोकात्सुभीतिः ८

निराशा निशा ते प्रतीच्यां प्रयातु
पुनः पूर्वदेशे दिनेशस्य ज्योतिः।
विदार्यैव तामिस्र जालं तनोतु
सुखं वैभवं शान्तिसन्देशमार्यम्।। ९

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चण्डिकास्तुतिः

चण्डिके चण्डिके भारतस्याम्बरे
श्रूयते सर्वदा ते प्रियं गर्जनम्।

किन्तु
भूयते बालिकानां वधोनित्यशः
संघ बद्धैर्दुराचारिभिः कामुकैः।। १

सिंहनादेन ते कामवाणैर्हताः
दानवायान्तु नाशंद्रुतं भारते।
नैव देशेपुनः श्रूयमाणाभवेत्
नायिकानां वधः संघबद्धैः खलैः।। २

अत्रास्ति विशेषः
कलि कौतुक वर्णनं रमणं पापकर्दमे।
तदेव क्षालनार्थाय आदावन्ते कृता स्तुतिः।। ३

शिवस्तुतिः

निपीतं त्वया सिन्धु हालाहलं भो
जगत् त्राणाहेतोर्भवानीशदेवः।
मदीयां हि पापस्य वन्यां निपीय
कथं नैव पापाद् विमुक्तं करोषि।। १

श्रुता ते सुकीर्त्तिः श्रुताभक्तप्रीतिः
श्रुताऽनन्तगाथा त्वदीया कृपायाः
अतस्तेऽ ङिघ्रमूले समागत्य शम्भो
अलं वै बलं याचते धर्महेतोः ।। २

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्री कृष्णाय नमः

कंसचाणूर हन्तारमीड्यं प्रभुम्
देवकीनन्दनं वासुदेवं हरिम्।
पाण्डवेभ्योऽपि नैजं विभुं दायिनम्
कृष्णचन्द्रं हृदा ऽ हं नमामीश्वरम्।। १

त्राणहेतोर्जनानां सदाचारिणाम्
दण्डहेतोर्जनानां दुराचारिणाम्।
आगतं भारते तं प्रभुं त्राणदम्
नौमि नित्यं हरिं नौमि नित्यं हृदा।। २

भक्तिपायसम्

रामभक्त्याऽभिभूतो भृशं देवशंभुः
वानरस्यैव रूपेण ख्यातिं जगाम।
रामसेवाकृते भारते जन्म लेभे
आञ्जनेयं शिवं वातजातं नमामि।। ३

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ श्री बालगोपालाह्वानम्

समुद्घुष्यतां रे समुद्घुष्यताम्
नैवभीतिर्हि कंसाद् यमाद्वाऽधुना।
बान्धवा: कंसतापेन तप्ताभृशम्
श्रूयतां श्रूयतां मे वच: सौख्यदम्।। १

माथुरेया हि ये कंससंरक्षिता:
ते तु भक्षन्ति नो जीवनं यौवनम्।
पावनं नो गवां पायसं नावनीतम्
दीयते कंसभीत्या हि निर्मूल्यमेव।। २

खाद्यते तैर्मुदा कंससंरक्षितै:
नैव तल्लभ्यते विन्दुमात्रं व्रजे।
बाहुना मर्दितुं पापिनो वै जनान्
रक्षितुं वर्धितुं नो यशो वैभवम्।। ३

बाधितं वै भवेत् प्रेषणं सत्वरम्
वीर्यदं वै पयो वा घृतं पुष्टिदम्।
बाहुवीरोहि वै पूज्यते कंसराज्ये
लभ्यते नैव गव्यस्य बिन्दुर्ब्रजे।। ४

यान्तु पुष्टिं शरीरेण वै यादवा:
त्रासमुक्तिं लभन्तां हि वै मानवा:।
लुण्ठितं स्याद् घृतं दानवायार्पितम्
तेन पुष्टा: सुपुष्टा: भवेयुर्जना:।। ५

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जना:शोषिता: धर्षितामर्दिता:
लभेयुः सुशान्तिं सुखं जीवने।
पाप पङ्के हि पङ्केरुहं वर्धताम्
दीयतां शिक्षणं वै क्षयेत्कश्मलम्।। ६

शाठ्यं शठेनैव सार्धं सदैव
कुर्याज्जनानां हि कल्याण हेतोः।
धार्ष्ट्यं न कार्यं गुरूणां पुरस्तात्
बद्धाञ्जलिः सेवकेव स्थितिः स्यात्।। ७

नववीतं घृतंदधि लभन्ते कंस सेवका:
तक्रं खादन्ति गोपाला: स्वल्पंतदपि दुर्लभम्।। ८

पुष्ट देहाहि गोपाला भवन्तु ब्रजमण्डले।
कदाचारं हि कंसस्य नष्टं कुर्वन्तु निर्भया: ९

आह्वानं कृष्णचन्द्रस्य सत्यं कल्याण कारकम्।
हृदिकृत्याचरणीयं कल्याणायहि भूतले।। १०

सर्वेभवन्तु सुखिन: सर्वेसन्तु निरामया:
समुद् घोषोहि सर्वदा श्रुतिगो मानवैर्भवेत्।। ११
इति श्री कृष्णाह्वानम्

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथैकादशाश्वस्तिवचनानि
साईंदेवस्य

१- आगमिष्यन्तिये भक्ताः शिरडींभक्ति भावतः।
तेषां दुःखंहि निखिलं करिष्ये सत्वरं क्षयम्।।

२- पादन्यासेन सोपाने पादाहता भविष्यन्ति।
दुरितानि तु सर्वाणि त्रातुं गच्छामि सेवकान्।

३- चिन्मयेन वपुषाऽहं त्रातुं गच्छामि सेवकान्।।

४- समाधिस्थै र्हि सेवकैः स्वाकाक्षितं हि लभ्यते।।

५- अमर्त्यं मां विजानीयात् स्वानुभवेन सत्यदृक्।

६- मम शरणमागतः नाप्तकामो हि को भुवि।
यदि वेद् वर्त्तते कोऽपि मां सूचयतु सत्वरम्।।

७- ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।।

८- कष्टं हि मम भक्तानाम् ममैव भूयते सदा।
सत्यं सत्यं वदाम्यहं मृषा नैवतु नैवहि।।

९- लक्ष्ये साहाय्यहेतवे आगच्छ मां सुपूरिते।।

१०-कांयेन मनसा वाचा ये सन्ति समर्पिताः।
ऋणेन तेन भक्तानाम् उऋणं न भवाम्यहम्।।

११-विहाय मां हि मद्भक्तः नान्यं देवं हि याचते।।

इत्येकादशवचनानि

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मातृभूमि-वन्दना

नमामः सदा वत्सले राम भूमे
नमामः सदा वत्सले कृष्ण भूमे।
त्वदीयाशिषा वर्धते धर्मभावः
त्वदीयाय सौख्याय मे यान्तु प्राणाः।। १

त्वदीयेन रोषेण दंदह्यते ऽ यम्
कुधर्मो ह्यधर्मो विधर्मो नृलोके।
भवेदेधमानो भवेद् वर्धमानः
स्व धर्मः स्वदेशे स्वधर्मो विदेशे।। २

भवेद् वातजातो ऽ पि सततं सहायः
भवेत्पूजितो वन्दितो नन्दितो ऽ यम्।
त्वदीया सुकीर्त्ति र्हि दिव्योज्वलेयम्
सदा पूर्ण चन्द्रेव ज्योत्स्नां तनोतु।। ३

समर्पणम्

समर्प्यते धियाहृदा पुस्तकं देश भक्तेभ्यः।
पठित्वोरसि कृत्य च रक्षन्तु देश संस्कृतिम्।। ४

जय भारतम्

विजयिनीस्याद्-रामसंस्कृतिः

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शीर्षक - कर्मवीराह्वनम्

क- जीवनं नश्वरं वैभवं नश्वरम्
नश्वरं सर्वमेवास्ति वै भूतले।
नैव ते नश्वरं पावनं वै यशः
लभ्यतां कर्मणा तन्निजे जीवने।। १

ख- हृद् बुद्धियुक्तं मनश्चेद् भवेत्
कर्म कर्त्तुं स्व हस्तौ सदा तत्परौ।
पुनीतं त्रयं चेत्तदा कीर्ति हे तोः
करौ प्रस्तुतौ दृष्टिगौ तौ भवेताम्।। २

ग- कर्मवीरमानवाः भवन्ति भाग्यलेखकाः।
कर्महीन मानवा भवन्ति भाग्य पाठकाः।
लिखन्ति कालप्रस्तरे कर्मवीरमानवाः।
स्वकीय कीर्तिगीतिकां गौरवाय देहिनाम्।।

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Sri Sri Anandamayee Ashram Collection, Varanasi